कुशलवोपाख्यानम्

प्रथमोऽध्यायः

जैमिनिरुवाच—

अयोध्यायां दाशरथिः शयानः किल सीतया ।
एकदा रात्रिसमये हृष्टः सीतां वचोऽब्रवीत् ॥ १ ॥

राम उवाच—

दोहदः कीदृशो भद्रे ! कस्मिन् वस्तुनि तद्वद ।
सीता तद्वचनं श्रुत्वा भर्तारमिदमब्रवीत् ॥ २ ॥

सीतोवाच—

तव प्रसादान्मे कामः परिपूर्णः सदाऽनघ ! ।
परं भागीरथीतीरे गन्तुमिच्छामि राघव ! ॥ ३ ॥
ऋषिपत्न्यश्च यत्रासन्नृषयोऽजिनवाससः ।
जहास रामः किमिदं न तृप्ता वनवासतः ॥ ४ ॥
सीते ! त्वं दण्डकारण्ये वर्षाणि नव पञ्च च ।
अद्य वा दोहदस्तेऽयं प्रथमो निष्फलः कथम् ॥ ५ ॥
प्रातर्भागीरथीतीरे गमनं तेऽस्तु जानकि ! ।
इति तस्यै प्रतिश्रुत्य सुष्वाप ससुखं प्रभुः ॥ ६ ॥
निशीथे तु व्यतिक्रान्ते चाराः पुरचरा निशि ।
रामं रहःसमागम्य वाक्यमूचुः पृथक् पृथक् ॥ ७ ॥

तव कीर्तिप्रतापश्च सर्वतो वर्ण्यते जनैः ।
रामः पृच्छत्यतिदृढं लोकानां कीदृशी स्थितिः ॥ ८ ॥

मम वा मम भार्याया भ्रातृणां दुष्कृतं किल ।
सुकृतं वा त्वया चार ! भ्रमता निशि यच्छ्रुतम् ॥ ९ ॥

तत्सत्यं वद चार ! त्वं मा भीतिं कुरु दण्डतः ।
चारोऽपि रघुनाथं तं प्रत्युवाच हसन्निव ॥ १० ॥

चार उवाच—

राम ! त्वद्दर्शनादेव दुष्कृतं भस्मसाद्भवेत् ।
तवापि दुष्कृतं मन्ये विपरीतं रघूद्वह ! ॥ ११ ॥

वयं स्थानानि पापानि भ्रमामो रघुनन्दन ! ।
त्वां दृष्ट्वा सर्वपापेभ्यो मुच्येम भरताग्रज ! ॥ १२ ॥

तथाऽपि लोको दुर्वारः किंचिद् दुष्टं वदत्यसौ ।
निशार्धे भ्रमता राजन् ! दृष्टं चित्रतरं मया ॥ १३ ॥

कस्यचिद्रजकस्यास्यां पुर्यां भार्याऽत्यगाद् गृहम् ।
पितुर्वेश्म समासाद्य तस्थौ दिनचतुष्टयं ॥ १४ ॥

रजक्या जनकश्चिन्तामगमत् किं मया कृतम् ।
स्मृत्यागमविरुद्धं हि कन्या यत् पितृवेश्मनि ॥ १५ ॥

तस्माद् दुहितरं चैतां नयिष्ये भर्तृसन्निधिं ।
यथाम्बरस्थं कलुषं शोधयेऽहं स्वकैः करैः ॥ १६ ॥

तथा स्थितायां कन्यायां गृहे यत्तन्न शोध्यते ।
इत्युक्त्वा भ्रातृभिः सर्वैं रजकः परिवेष्टितः ॥ १७ ॥
जामातरं समासाद्य कन्यां तस्मै न्यवेदयत् ।
ततः क्रुद्धोऽब्रवीद्वाक्यं सृक्किणी परिलेलिहन् ॥ १८ ॥
जामाता हस्तमुद्यम्य रामोऽहमिति वो मतिः ।
राक्षसानां गृहे सीतां वसन्तीमाजहार यः ॥ १९ ॥
एतावदेव रघुनन्दन ! सोऽब्रवीत्तद्वाक्यं
पुनः पुनरिदं रजकोऽत्र कोपात् ।
राज्ञा समर्थपदवीमधितिष्ठता तद्
रामेण चेत्कृतमहं न तथा करोमि ॥ २० ॥
इत्थं वचांसि स्म वदत्यवश्यं
नान्य जनो वक्तुमलं बभूव ।
ततो मया वाक्यमिदं विविक्तं
सत्यं ब्रवीत्येष कुतो हि रामः ॥ २१ ॥
गङ्गातटद्वीपनिखातयूपः
स्वधर्मनिष्ठः पितृवाक्यकर्त्ता ।
जेता दशास्यस्य जगच्छरण्यः
स राघवः केन समोऽस्ति लोके ॥ २२ ॥
आचारेषु निषण्णोऽयं न गुणेषु च सस्पृहः ।
मूढो न वेत्ति तं रामं गुणिनं रजको ह्ययम् ॥ २३ ॥

मनसा चिन्तयित्वैवं राम ! त्वामहमागमम् ।
दूतं तं तु विसृज्याशु चिन्तयामास राघवः ॥ २४ ॥

शुद्धाऽपि जानकी वह्नौ लोकेऽस्मिन् परिगर्ह्यते ।
तस्मात्त्यजेयं नो वेति चिरं दध्यौ स जानकीम् ॥ २५ ॥

कथं तां मृगशावाक्षीं सीतां पद्मनिभाननां ।
त्यजामि श्रोत्रियो मुख्यामाचारस्येव पद्धतिम् ॥ २६ ॥

अथ चेमां परित्यक्ष्ये कलौ विप्रा यथा श्रुतिम् ।
इति चिन्तयतस्तस्य प्रातःकालोऽभवत्तदा ॥ २७ ॥

जैमिनिरुवाच—

ततोऽसौ जानकीत्यागे मनःकृत्वा रघूद्वहः ।
आह्वयामास भरतं शत्रुघ्नं लक्ष्मणं तथा ॥ २८ ॥

एतस्मिन्नन्तरे प्राप्तो भरतो लक्ष्मणस्तथा ।
शत्रुघ्नश्च महाबाहुः सेवितुं रघुनन्दनम् ॥ २९ ॥

ददृशुस्ते ततो रामं विषण्णं दीनचेतसम् ।
प्रोचुस्तेऽन्योन्यमासीनं रामं शीघ्रं न चागताः ॥ ३० ॥

तस्मात्किं कुपितो भ्राता दृष्ट्वाऽस्मान्दानवर्जितान् ।
किमस्माभिर्द्विजश्रेष्ठाः प्रातर्नो पूजिता इति ॥ ३१ ॥

न प्रातर्जागृताः किं वा किं वा शीघ्रं नमस्कृताः ।
इत्येतत्संवदन्तस्ते भ्रातरो वह्नितेजसः ॥ ३२ ॥

आयाता रघुनाथं तं नमस्कृत्येदमब्रुवन् ।
त्वन्मनस्कान् सदा राम ! त्वत्समर्पितकर्मणः ॥ ३३ ॥

त्वद्दर्शनसमुत्कण्ठान् किमस्मान्नाभिनन्दसे ।
रामस्तेषां वचःश्रुत्वा स शनैर्वाक्यमब्रवीत् ॥ ३४ ॥

इति कुशलवोपाख्याने
रामवाक्यं नाम
प्रथमोऽध्यायः

द्वितीयोऽध्यायः

जैमिनिरुवाच—

रामस्तु कथयामास चारेणोक्तं यथा निशि ।
सीता च गर्ह्यते लोकैर्यथा पाखण्डिभिः श्रुतिः ॥ १ ॥
लोकापवादभीतेन त्यज्यते जानकी मया ।
संसारभयभीतेन योगिना ममता यथा ॥ २ ॥
तद्रामवाक्यमाकर्ण्य वज्रपातोपमं तदा ।
भ्रातरस्ते त्रयोऽभूवन् रोमाञ्चितवपुर्धराः ॥ ३ ॥
अब्रवीद्भरतस्तेषां रघुनाथमिदं वचः ।
कृपालुत्वं रामचन्द्र ! त्वय्येव परिगीयते ॥ ४ ॥
अन्त्यजेभ्यो बलात्कश्चित्कपिलां गां समानयेत् ।
पश्चात्संसर्गदुष्टत्वात् त्यजेत्तां विपिने तु कः ॥ ५ ॥
जानकीं त्वं तथादाय राक्षसात्त्यक्तुमिच्छसि ।
सीता तुभ्यं ददौ शुद्धिमात्मनोऽग्निमुखे परा ॥ ६ ॥
तत्त्वया विस्मृतं राम ! किं वा पित्रा पुरोदितम् ।
वह्नौ प्रदीप्ते ज्वालाभिर्लिहन्तीभिरिवाम्बरम् ।
सीतायां च प्रविष्टायां तदा दशरथोब्रवीत् ॥ ७ ॥
विमानस्थोऽम्बरे राम ! त्वां प्रतीदृग्वचः शुभम् ।
इमां शुद्धां विद्धि पुत्र ! जानकीं भर्तृतत्पराम् ॥ ८ ॥

अस्याश्चरित्रेण कुलं नः सर्वं विमलीकृतम् ।
ये मृताः पुत्रशोकेन तेषां गतिरनुत्तमा ॥ ९ ॥
जानकी नः स्नुषा येन तेन वासस्त्रिविष्टपे ।
एतद्दशरथेनोक्तं वचनं विस्मृतो भवान् ॥ १० ॥
ब्रह्मादिभिर्देवगणैर्यत्प्रोक्तं तच्च संस्मर ।
वह्नौ विशुद्धा वैदेही फुल्ला सत्कलिका यथा ॥ ११ ॥
गुम्फिता वानरैर्दृष्टा मालेव रघुसत्तम ! ।
तथापि ते मनो राम ! कठिनं परिलक्ष्यते ॥ १२ ॥

जैमिनिरुवाच

भरतेनेदृशैर्वाक्यैः प्रोक्तो रामोऽब्रवीद्वचः ।
सत्यमुक्तं त्वया भ्रातः ! शुद्धा जनकनन्दनी ॥ १३ ॥
लोकापवादो दुर्वारो राज्ञां कीर्तिविनाशनः ।
कीर्तिहीनं जन्म येषां जीवन्तोऽपि मृता हि ते ॥ १४ ॥
पुरूरवा हरिश्चन्द्रो नहुषो वैन्य एव च ।
वरिष्ठा नृपमुख्यास्ते गीयन्ते यशसा भुवि ॥ १५ ॥
मान्धाता सगरश्चैव ह्यम्बरीषो भगीरथः ।
ऋतुपर्णो नलश्चैव ये चान्ये पुण्यकीर्तयः ॥ १६ ॥
ख्यातिं प्राप्ता हि राजानः सत्कीर्त्यैव रघूद्वह ! ।
न कीर्तिसदृशं किञ्चिन्नराणामिह विद्यते ॥ १७ ॥

पापत्राणं पुण्यदञ्च स्वर्गादिप्राप्तिकारकम् ।
अपकीर्तिस्तु यस्यैव गीयते मानवैर्भुवि ॥ १८ ॥
तस्य जन्म वृथा मन्ये जीवितं च निरर्थकम् ।
मुहूर्तमपि जीवेत नरः शुद्धेन कर्मणा ॥ १९ ॥
युगान्तमपि नैवेह नरः कीर्तिं विना क्वचित् ।
किन्न जीवन्ति हि चिरं काकोलूकादिपक्षिणः ॥ २० ॥
तथा तज्जीवितं मन्ये नृणां कीर्तिविवर्जितम् ।
यैः पुत्रैर्बन्धुभिर्दारैः पुंसामपयशो भवेत् ॥ २१ ॥
त्याज्याः पुत्रा बान्धवाश्च दाराः प्राणप्रिया अपि ।
श्रूयते हि पुरा राज्ञा शिबिना सत्यवादिना ॥ २२ ॥
कीर्त्यर्थं हि स्वदेहस्य दत्तं मांसं हि विष्णवे ।
तथैव कवचं कर्णो वासवाय ददौ पुरा ॥ २३ ॥
जीवनं वैनतेयाय ददौ जीमूतवाहनः ।
ददौ दधीचिरस्थीनि कीर्त्यर्थं कीर्तिकृद्दृषिः ॥ २४ ॥
तस्मादिमां परित्यक्ष्ये जीर्णां त्वचमिवोरगः ।
जीविते मम चेदिच्छा तव कैकेयिनन्दन ! ॥ २५ ॥
पुनस्त्वया न वक्तव्यं तदीदं वचनं मयि ।
तावत्स लक्ष्मणः क्रुद्धो धुन्वन् हस्तावथाब्रवीत् ॥ २६ ॥
निष्पिष्य पाणिना पाणिं निःश्वसन्नुरगो यथा ।
विसृजंश्च स्वनेत्राभ्यां कवोष्णं वारि दुःखजम् ॥ २७ ॥

लक्ष्मण उवाच—

आः किं लोकापवादे त्याज्या सीता रघूद्वह ! ।
भार्याकलहतः कश्चिन्मातरं त्यक्तुमर्हति ॥ २८ ॥
तथा त्वं सर्वलोकस्य जननीं हातुमिच्छसि ।
पापिनस्तान् हनिष्यामि ये सीतां दूषयन्ति हि ॥ २९ ॥
म्लेच्छपूज्यैरधर्मज्ञैर्यवनैर्दूष्यते श्रुतिः ।
सा किं त्याज्या द्विजवरैरिति राम ! विचारय ॥ ३० ॥
शत्रुघ्नः कुपितस्तावद्राघवं प्रत्यवोचत ।

शत्रुघ्न उवाच—

राम ! त्वं यद्वचो ब्रूषे त्यक्ष्ये प्राणानहं यथा ।
त्वया ये त्याजिताः प्राणास्तेऽमरत्वं प्रपेदिरे ॥ ३१ ॥
यदि त्वं हास्यसि प्राणानमरस्त्वं भविष्यसि ।
तथा ये त्वां समाश्रित्य वर्तेयुः पापयोनयः ॥ ३२ ॥
निर्दुःखा नीरुजास्ते स्युः किं पुनर्जनकात्मजा ।
अथवा त्वां मृतं सीता जीवयेत् पतिलालसा ॥ ३३ ॥
त्वं च तां मृगशावाक्षीं मृतां जीवयसे कथम् ।
शत्रुघ्नस्य वचः श्रुत्वाऽवोचद्रामः शनैः शनैः ॥ ३४ ॥

राम उवाच—

आत्मानमप्यहं जह्यां युष्मांश्च पुरुषर्षभ ! ।
अपवादभयाद्भीतः किं पुनर्जनकात्मजाम् ॥ ३५ ॥

जैमिनिरुवाच—

रामे ब्रुवति राजेन्द्र ! सीतां त्यक्तुं कृतोद्यमे ।
ततो भरतशत्रुघ्नौ गृहं स्वं स्वमगच्छताम् ॥ ३६ ॥

लक्ष्मणो न ययौ रामं त्यक्त्वा दुःखाटवीगतम् ।
लक्ष्मणं केवलं दृष्ट्वा रामो वाक्यमथाब्रवीत् ॥ ३७ ॥

सौमित्रे ! छिन्धि खड्गेन शिरो मे, न विचारय ।
सीतां भागीरथीतीरे त्यक्तुं वा गच्छ मा चिरम् ॥ ३८ ॥

सीतापरित्यागभवो दोषो मम, तवास्तु न ।
नौमि ते चरणौ भ्रातः, सीतां मुञ्च सरित्तटे ॥ ३९ ॥

रामेणोक्तो लक्ष्मणस्तु लज्जयावनतः श्वसन् ।
संशयाक्रान्तचित्तः सन् चिन्तयामास चेतसि ॥ ४० ॥

श्रूयते धर्मशास्त्रेषु गुरोराज्ञा गरीयसी ।
पुरा परशुरामेण स्वपितुर्वचनात्तथा ॥ ४१ ॥

परश्वधेन वै छिन्नमाशु स्वजननीशिरः !
मनसा निश्चयं कृत्वा कर्तुं रामवचो नृप ! ॥ ४२ ॥

यन्तारमब्रवीद् वीरो रथमानय साश्वकम् ।
तेनानीतं रथवरं समारुह्य जगाम सः ॥ ४३ ॥

सीताभवनमुद्दिश्य ततोऽश्वा न्यपतन् भुवि ।
अथ यन्त्रा कशाघातैस्ताडितास्ते ययुः शनैः ॥ ४४ ॥

संप्राप्य सीताभवनं लक्ष्मणोऽवतरद्रथात् ।
प्रविश्य भवनं सीतां नमश्चक्रेऽप्यवाङ्मुखः ॥ ४५ ॥
सीतैवंविधमालोक्य लक्ष्मणं वाक्यमब्रवीत् ।

सीतोवाच—

मनोरथप्रदो भर्त्ता मम राजीवलोचनः ॥ ४६ ॥
मया हसन्त्या यद्रात्रौ याचितं तद्ददौ रघुः ।
दत्तेऽपि निष्फलं देव यावत्त्वं नैव दृश्यसे ॥ ४७ ॥
अधुना तद्वचोवाक्यं सत्यं कर्तुं त्वमागतः ।
ग्रहीष्यामि विचित्राणि वासांस्यगुरुचन्दनम् ॥ ४८ ॥
मुनिभ्यो मुनिपत्नीभ्यो दातुं श्रेयोऽभिवृद्धये ।
तस्यास्या वचनं श्रुत्वा लक्ष्मणो हृदि विव्यथे ॥ ४९ ॥
मुञ्चन्नश्रूणि शनकैरेवं कुर्विति सोऽब्रवीत् ।
भ्रातुर्वचनपाशेन बद्धः परवशस्तदा ॥ ५० ॥

जैमिनिरुवाच—

ततः सीतादुकूलानि निदधौ स्यन्दनोपरि ।
अजिनानि विचित्राणि खाद्यानि विविधानि च ॥ ५१ ॥
पादुके रामचन्द्रस्य सौवर्णे मणिचित्रिते ।
एवं संस्थाप्य वस्तूनि श्वश्रूं प्रष्टुमथो ययौ ॥ ५२ ॥
कौसल्यां रामजननीं सीता नत्वेदमब्रवीत् ।
दोहदो मम संजातो रन्तुं भागीरथीतटे ॥ ५३ ॥

तं च पूरयितुं प्राप्तो लक्ष्मणो मम देवरः ।
अनुज्ञा युष्मदीया चेत्ततो गच्छामि तद्वनम् ॥ ५४ ॥

सीतावचनमाकर्ण्य कौसल्या प्राह जानकीम् ।

कौसल्योवाच—

सीते कथं वनं यासि वृक्षकण्टकसंयुतम् ।
वराहव्याघ्रसिंहादिसत्त्वैर्व्याप्तं भयंकरम् ॥ ५५ ॥
शीतोष्णवातवर्षादिदुःखदं त्वमनिन्दिते ।
चिरात्प्राप्तं राज्यसुखं परित्यज्य शुचिस्मिते ॥ ५६ ॥
कठोरहृदयैः सेव्यं वनं गन्तुमिहेच्छसि ।
त्वं तु रामं परित्यज्य वनं गन्तुं न चार्हसि ॥ ५७ ॥
मुखं प्रभाते मलिनं तवोष्ठौ शुष्यतः श्रमात् ।

सीतोवाच—

मद्भर्त्ता वनवासी च सदा कण्टकमर्दनः ॥ ५८ ॥
निर्मलो जीवयेद्यस्तु वानरान्कोटिशो रणे ।
तं स्मरन्तीं तादृशीं मां दुःखदं न वनं भवेत् ॥ ५९ ॥
रामनाम जपन्त्याश्च ममोष्ठौ शुष्यतः कथम् ।
मनोवाक्कर्मभिः सेवा युष्मदीया कृता मया ॥ ६० ॥
ततो मम वने नार्तिर्भविष्यति च नौमि वः ।
इति प्रदक्षिणीकृत्य श्वश्रूं सीताभिनन्दिता ॥ ६१ ॥

कैकेयीं च सुमित्रां च नत्वा पृष्ट्वा जगाम सा ।
यत्रासौ लक्ष्मणः शूरो रथमादाय तस्थिवान् ॥ ६२ ॥
आरुरोह रथं सीता हर्षनिर्भरमानसा ।
स गद्गदितकण्ठोऽसौ सौमित्रिः प्राह सारथिम् ॥ ६३ ॥
चोदयाश्वान्कशाघातैर्यथा शीघ्रं प्रयान्ति हि ।

जैमिनिरुवाच—

तस्य तद्वचनं श्रुत्वोवाच सूतोऽथ लक्ष्मणम् ॥ ६४ ॥
अहमश्वमनो वेद्मि यथावत् पुरुषर्षभ ! ।
चलाचलप्रोथतया वक्तुकामा इमे हयाः ॥ ६५ ॥
शीघ्रं हि यदि गच्छेम ततो नश्चरणैर्महो ।
दूयेत सीतादुःखेन दुःखिताऽद्यौ विशेषतः ॥ ६६ ॥
संग्रामे नो गतिः श्लाघ्या नेदृशे कुत्सिते पथि ।
इत्येवं हृदि मन्यन्ते वाजिनो भरतानुज ! ।
तथाऽपि प्रेरयाम्यद्य पश्य मे हस्तलाघवम् ॥ ६७ ॥
इत्येवमुक्त्वा वचनं स सारथिः
पाण्योस्तलेनाभिजघान कन्धराम् ।
रश्मीन् समादाय कशामुदीरयन्
प्राचोदयत्तीव्ररयान्हयांस्तदा ॥ ६८ ॥

इति कुशलवोपाख्याने
लक्ष्मणप्रस्थानं नाम
द्वितीयोऽध्यायः

तृतीयोऽध्यायः

जैमिनिरुवाच—

गच्छन्तीं तां समालोक्य सीतां पद्मनिभाननाम् ।
अयोध्याऽतीव दुःखेन व्यथिता वातचञ्चलैः ॥ १ ॥
ध्वजानां पल्लवैरेनां वारयन्तीव दृश्यते ।
ततस्तेन रथेनासौ गच्छन्ती जानकी पथि ॥ २ ॥
ददर्श दुर्निमित्तानि घोराणि सुबहून्यपि ।
शिवा संमुखमागत्य व्यरावीद्रौरवं यथा ॥ ३ ॥
हरिणा मार्गमुल्लङ्घ्य प्रधावन्ति स्म सर्वशः ।
स्फुरति स्म ततो नेत्रं दक्षिणं पुरुषर्षभ ! ॥ ४ ॥

जैमिनिरुवाच—

ततस्तु विपरीतानि दुश्चिह्नानि विलोक्य सा ।
विस्मिता जानकी वीरं लक्ष्मणं प्रत्यवोचत ॥ ५ ॥
पश्य लक्ष्मण चिह्नानि शिवा गोमायवो मृगाः ।
मार्गमावृत्य तिष्ठन्ति रुदन्ति भयसूचकाः ॥ ६ ॥
परं स्वस्त्यस्तु रामाय कौसल्याहर्षकारिणे ।
तस्य बाह्वोर्बलम्भूयादायुष्यं परिवर्धताम् ॥ ७ ॥
येन रामेण घोराणि रक्षोवृंदानि भूतले ।
पातितानि शरैस्तीक्ष्णैः शुभं तस्यास्तु सर्वदा ॥ ८ ॥

खरश्च दूषणो येन त्रिशिरा यमसादनम् ।
प्रापिता वै जनस्थाने स राज्यं कुरुतां ध्रुवं ॥ ९ ॥
अगाधो बाधतां नीतो वानरैर्येन सागरः ।
विभीषणो भयात्त्रातः सोऽस्त्ययोध्यापतिः सुखी ॥ १० ॥
महाबलौ रावणकुम्भकर्णौ
लङ्कापती तौ प्रथितौ पृथिव्यां ।
पापस्य साक्षादिव मूर्तिभाजौ
भिन्नौ रणे येन शरैः सुतीक्ष्णैः ॥ ११ ॥
मन्दोदरीनेत्रजलैश्च लङ्का-
मभ्युक्ष्य वीरं हरिसूनुमग्रे ।
यः प्रेरयामास मदर्थमेव
स राघवो विश्वसुखप्रदोऽस्तु ॥ १२ ॥
एवं वदन्ती जनकात्मजाऽसौ ।
प्रायात् त्रिमार्गां जनपापहन्त्रीम् ।
कल्लोलजालं गगने वितन्वतीं
पयोऽति गौरं दधतीं पवित्रं ॥ १३ ॥
जम्ब्वाम्रचम्पककुलिन्दपटाश्म सार
खर्जूरपूगकदलीपनसाढ्यतीरां ।
द्राक्षाफलस्तवकशोभितमण्डपालीं
सौवर्णकेतकवनावलिमुद्वहन्तीम् ॥ १४ ॥

तां देवलोकतटिनीं प्रसमीक्ष्य सीता
हृष्टा बभूव सफलं मम जन्म चैतत् ।
रामस्य कीर्तिमिव शुभ्रतमां प्रवाहैः
पापानि सर्वजगतः खलु नाशयन्तीम् ॥ १५ ॥

जैमिनिरुवाच—

लक्ष्मणस्तु रथात्तस्मादवतीर्य यथा भुवं ।
नावं नाविक संयुक्तामारुरोह तया सह ॥ १६ ॥
गङ्गायास्तटमासाद्य परं भयविवर्धनम् ।
अवातरत्ततः सीता नावो लक्ष्मण एव च ॥ १७ ॥
सौमित्रिर्जानकी चापि सस्नतुर्जाह्नवीजले ।
परिधाय ततो वस्त्रे जग्मतुर्वनगह्वरम् ॥ १८ ॥
यस्मिन्धवाश्च खदिरा धाऽयो बदरिकास्तथा ।
बकुलाः पिप्पलाः शुष्काः कोटरैश्चोपलक्षिताः ॥ १९ ॥
कुशानांकण्टकास्तीक्ष्णास्तथा गोक्षुरकादयः ।
निम्बाश्च बहवः सन्ति क्रूराः पक्षिगणास्तथा ॥ २० ॥
जीर्णबोधिद्रुमस्थाश्च काकाः क्रेङ्कारकारिणः ।
तेषां कोटरमध्यस्थाः सर्पाः फूत्कारकारिणः ॥ २१ ॥
चित्तकारण्यमहिषाः सूकराः स्थूलदंष्ट्रिणः ।
कृष्णाङ्गा ऊर्ध्वपुच्छाश्च वृश्चिका बहवस्तथा ॥ २२ ॥
व्याघ्रा मृगगणं धर्तुं निश्चला योगिनो यथा ।
बिडाला मूषकबिलं समाश्रित्य खनन्ति वै ॥ २३ ॥

तथाविधं वनं दृष्ट्वा सीता रोमाञ्चिता बभौ ।
यथा रामस्य कीर्तिस्त्री कंटकैः परिवेष्टिता ॥ २४ ॥
सौमित्रिमब्रवीद्भीता दुर्निमित्तानि पश्यती ।

सीतोवाच —

सौमित्रे ! न च पश्यामि मुनीनामाश्रमानहम् ।
पवित्रवेषास्ताः साध्वीर्न पश्यामि तपस्विनीः ॥ २५ ॥
मौञ्जीकृष्णाजिनधृतो द्वादशाब्दाञ्छिखाधृतः ।
ऋषिपुत्रान्न पश्यामि मुनीन् वल्कलवाससः ॥ २६ ॥
नाग्निहोत्रोत्थितो धूमो दृश्यते भरतानुज ! ।
सर्वतो दृश्यते चायं दावः काष्ठतृणं दहन् ॥ २७ ॥
न वेदध्वनिरत्रास्ति श्रूयते पक्षिणां रुतम् ।
कथं वेदध्वनिः श्राव्यस्त्यजन्त्या रघुनन्दनम् ॥ २८ ॥
मयाऽसौ रघुनाथश्च त्यक्तो बुद्ध्या ततो न हि ।
दृश्यते मुनिपत्न्यस्ता मुनिपुत्रा मुनीश्वराः ॥ २९ ॥
पवित्रैरेव दृश्यन्ते पवित्राश्रमवासिनः ।
मया रामपराङ्मुख्या पवित्राणि कुरूपया ॥ ३० ॥
कथं तान्यग्निहोत्राणि दृश्यन्ते वनवासिनाम् ।

जैमिनिरुवाच—

वचांसि तानि सौमित्रिः शृण्वन्नश्रूण्यमुञ्चत ॥ ३१ ॥
अधः पश्यन्नुवाचासौ लक्ष्मणो विह्वलो बहु ।

लक्ष्मण उवाच—

सीते ! स आश्रमो दूरे गम्यतां वै शनैः शनैः ॥ ३२ ॥
रामेण त्वं परित्यक्ता सत्यं लोकापवादतः ।
तवापि दोहदो जातो द्रष्टुं भागीरथीं नदीम् ॥ ३३ ॥
मामसौ प्रेरयामास त्वां हातुं गहने वने ।
किं करोम्यवशो मातर्भ्रातुस्तस्य वचोहरः ॥ ३४ ॥
इति तस्य वचः श्रुत्वा पपात धरणीतले ।
मूर्च्छिता जानकी तस्मिन्नम्बराद्धोहिणी यथा ॥ ३५ ॥
छिन्नमूला यथा वल्ली वृष्टिः शूलाभिपीडिता ।
कुमारी सर्पदष्टेव तद्वत् सा भूतलेऽपतत् ॥ ३६ ॥
ततस्तां लक्ष्मणस्त्रस्तां वस्त्रान्तेनाभ्यवीजयत् ।
हस्तेनैकेन चच्छायां कुर्वंश्च मुखपङ्कजे ॥ ३७ ॥
उवाच यदि रामस्य साक्षात्सेवा कृता मया ।
तर्हीयं जानकी शीघ्रं समुत्तिष्ठतु तादृशी ॥ ३८ ॥
इत्येवं वदतस्तस्य चेतनां लभते स्म सा ।
नेत्रे समुन्मिलन्ती वै लक्ष्मणं ददृशे पुरः ॥ ३९ ॥
अवोचत शनैरेव मां त्यक्त्वा गहने वने ।
कथं यास्यसि सौमित्रे जनस्थाने यथा पुरा ॥ ४० ॥
देवराणां देवरस्त्वं मम पूज्यतमो मतः ।
त्वयाऽहं दण्डके त्राता विराधाङ्कगता पुरा ॥ ४१ ॥

फलमूलाबुम्भिः शुद्धैः परिचर्या कृता त्वया ।
पर्णशाला विचित्रास्ता मदर्थमुपकल्पिताः ॥ ४२ ॥

इदानीं त्वदृते तास्ताः कः करिष्यति लक्ष्मण ! ।
अग्रतः याति रामो मां पृष्ठतस्तु भवान् वने ॥ ४३ ॥

हा दुःखं तु मया प्राप्तं रामो मां विजहौ यतः ।
अपराधादृते वीरो राजा राजीवलोचनः ॥ ४४ ॥

मनसा कर्मणा वाचा नापराध्यामि तं पतिम् ।
सदा तच्चरणौ चित्ते चिन्तयामि मनोरमौ ॥ ४५ ॥

मुखं पद्मविशालाक्षं निर्मलं चन्द्रबिम्बवत् ।
चारुदंष्ट्रं शमश्रुलञ्च कुण्डलाभ्यां सुशोभितम् ॥ ४६ ॥

मुक्तामाणिक्ययुक्तेन किरीटेनोपलक्षितम् ।
द्रक्ष्यामि रामस्य कथं पतिता गहने वने ॥ ४७ ॥

काकपक्षधरः पूर्वं रामः कौशिकसंयुतः ।
आगतो मिथिलां पूर्णस्त्वया सह महामते ! ॥ ४८ ॥

त्रैयम्बकं द्विधा चक्रे परिणेतुं च मां धनुः ।
मदर्थे वानरैः सार्द्धं सख्यं यो व्यदधाद्रघुः ॥ ४९ ॥

मद्वियोगे सति पुरा वृक्षानालिङ्गति स्म यः ।
स रामो व्यजहात्सीतां दैवमेव हि कारणम् ॥ ५० ॥

न दोषस्तस्य रामस्य ममायमिति चिन्तये ।
अथवा प्राक्तनानां हि विपाको मम कर्मणाम् ॥ ५१ ।

लक्ष्मण ! त्वं महाबाहो ! निर्दोषश्चैव राघवः ।
अयोध्यां गच्छ शीघ्रं त्वं यतो हि परवानसि ॥ ५२ ॥
यो गर्भे रक्षिता देवो यो वै लङ्काधिवासिनीम् ।
मां स वै रक्षिता चाद्य न दुःखं कर्तुमर्हसि ॥ ५३ ॥
लक्ष्मण ! त्वं महाबाहो ! श्वश्रून् विज्ञापनं कुरु ।
युष्माकं चरणौ नित्यं चिन्तयामि वनेचरा ॥ ५४ ॥
ससत्वाहं वने त्यक्ता रामेणापि विजानता ।
इत्येवं विलपन्ती सा जानकी गहने वने ॥ ५५ ॥
पुनरेव शुभाचारा लक्ष्मणं वाक्यमब्रवीत् ।

सीतोवाच—

व्यापारेऽस्मिन्कथं रामस्त्वां कृपालुमयोजयत् ॥ ५६ ॥
प्रेरणीयः स सुग्रीवः कठिनो भ्रातृघातकः ।
विभीषणो वा बलवान्रावणद्रोहकारकः ॥ ५७ ॥
यो यत्र विषये दक्षः स तत्र विनियोज्यते ।
वृथा त्वां प्रेरयामास त्यागे मम रघूद्वहः ॥ ५८ ॥
गच्छ लक्ष्मण ! भद्रं ते स्वां पुरीं रामपालिताम् ।
मार्गे क्षेमं भवतु ते भ्राता ते कुप्यते रघुः ॥ ५९ ॥
इति तस्या वचः श्रुत्वा सौमित्रिर्दुःखितो भृशम् ।
प्रदक्षिणीकृत्य तदा नमश्चक्रेऽप्यवाङ्मुखः ॥ ६० ॥
गच्छन्नुवाच सौमित्रिस्त्वां मातः ! वनदेवताः ।

रक्षन्तु विपिने चास्मिन्नेष गच्छामि तद्वशः ॥ ६१ ॥
निर्ययौ लक्ष्मणो वीरः पश्यंस्तां जनकात्मजाम् ।
पादौ न चलतस्तस्य कृच्छ्रेण महता ययौ ।
पश्यती जानकी मूर्तिं लक्ष्मणस्यापि निश्चला ॥ ६२ ॥
न ददर्श यदा तं तु निपपात धरातले ।
मूर्छिता जानकी तत्र मुहूर्तं स्यावतिष्ठति ॥ ६३ ॥
अथैत्य वीरः सौमित्रिस्त्वीर्त्वा भागीरथीं ययौ ।
एकाकिनी वने बाला विललाप मृगी यथा ॥ ६४ ॥
हा पापं किं मया चीर्णं यत्त्यक्ता गहने वने ।
जनकस्य कुले जाता दत्ताऽस्मै रघवे पुरा ॥ ६५ ॥
दिशोऽवलोकयामास शून्याश्च विदिशस्तथा ।
आगमिष्यति चैवायं लक्ष्मणोऽपि हसेच्च किम् ॥ ६६ ॥
पुनर्मूर्छामवाप्यासौ जानकी भयविह्वला ।
तद्दुःखदुःखिता हंसा रुदन्ति क्रूरनिस्वनम् ॥ ६७ ॥
मृणालानि परित्यज्य तद्द्रुतमिवाभवत् ।
तृणाङ्कुरं विहायाशु सीतां पश्यन्ति तादृशीम् ॥ ६८ ॥
एणशावा हरिण्यश्च कृष्णसारा विशेषतः ।
मयूरा नृत्यमुत्सृज्य तस्मिन्काले प्रधाविताः ॥ ६९ ॥
शकुन्ता विजहुर्भक्षं छायां पक्षैः स्म कुर्वते ।
जलस्थाः पक्षिणश्चाभिसिषिचुर्जनकात्मजाम् ॥ ७० ॥

चमर्यः पुच्छचमरैर्वीजयन्ति स्म जानकीम् ॥ ७१ ॥
अथ भागीरथीतीरे स्नातः पुष्पाण्युपाहरन् ।
अर्चयामास पवनः सीतां सौगन्ध्यसंयुतः ।
तदा स्थिता विशालाक्षी रामरामेति भाषिणी ॥ ७२ ॥
विचेष्टन्ती मुक्तकेशा भूमौ पांसुभिरावृता ।
यदि प्राणानिमान्हास्ये भ्रूणहत्या भविष्यति ॥ ७३ ॥
किं करोमि क्व गच्छामि को मे त्राता भविष्यति ।
इतस्ततो धावमाना स्खलन्ती च पदे पदे ।
कुशानां कण्टकास्तीक्ष्णाः पादयोराचरन्व्यथाम् ॥ ७४ ॥
सुस्रुवे रुधिरं पद्भ्यां वैदेह्या भरतर्षभ ! ।
एवं दुःखातुरा बाला वर्तते स्म तदा वने ॥ ७५ ॥
तावत्स धीमान्बहुभिः समावृतो
वाल्मीकिरुग्रैश्च तपोभिरीडितः ।
यूपानथ च्छेदयितुं मखार्थं
समागतस्तां ददृशे विषण्णाम् ॥ ७६ ॥

इति कुशलवोपाख्याने
वाल्मीकिसमागमो नाम
तृतीयोऽध्यायः

चतुर्थोऽध्यायः

जैमिनिरुवाच—

वाल्मीकिस्तां ततो दृष्ट्वा विषण्णां दीनचेतसां ।
तपःसिद्धिमिव क्लिन्नां स्वकीयामनवेक्षणात् ॥ १ ॥
उवाच का त्वं कल्याणि ! पुत्री कस्य परिग्रहः ।
कस्मादस्मिन्वने शून्ये तिष्ठसे विस्तराद्वद ॥ २ ॥
ततः सीता नमस्कृत्य प्रोवाचातीव दुःखिता ।
सुता वै जनकस्याहं स्नुषा दशरथस्य च ॥ ३ ॥
रामस्य भार्या भूदेव ! सदापतिपरायणा ।
त्यक्ताऽस्मि तेन रामेण न जाने केन हेतुना ॥ ४ ॥
वाल्मीकिस्तां समाश्वास्य प्रोवाच वचनं शुभम् ।

वाल्मीकिरुवाच—

सीते ! लभस्व पुत्रौ द्वौ मा शोकं कुरु सुव्रते !।
वाल्मीकिरिति नामाहं मुनिर्जनकपूजितः ॥ ५ ॥
प्राप्ताश्रमं मे रुचिरं पत्रपुष्पफलाढ्यतम् ।
पर्णशालां विधास्यामि त्वदर्थं वरवर्णिनि ! ॥ ६ ॥
यत्र प्रसूतिर्भविता रुचिरा तव जानकि !।
मुनेस्तद्वचनं श्रुत्वा हर्षिता जनकात्मजा ॥ ७ ॥
निदाघार्ता मयूरीव श्रुत्वा वै घननिस्वनम् ।
बाढमित्येवमुक्त्वा सा प्रययौ पृष्ठतो मुनेः ॥ ८ ॥

तया सह महाभागो वाल्मीकिः प्राप चाश्रमम् ।
यस्मिन्व्याघ्राश्च सिंहाश्च गोभिः क्रीडन्ति हर्षिताः ॥ ९ ॥
बिडालास्येषु लीयन्ते मूषकाः स्वबिले यथा ।
नकुला उरगाश्चैव मयूरा यत्र रेमिरे ॥ १० ॥
रमते स्म मृगैः सार्धं चित्तकास्त्यक्तमत्सराः ।
सरसीषु विचित्रासु बको मत्स्यान्न हन्ति हि ॥ ११ ॥
सा चैनमाश्रमं दृष्ट्वा वाल्मिकेस्तांस्तपोधनान् ।
ऋषिभार्याः शुभाचारा ऋषिपुत्रांश्च शोभनान् ॥ १२ ॥
हर्षेण महताविष्टा नमश्चक्रे पुनः पुनः ।
ताभिस्तैश्च प्रयुक्ताशीर्जानकी शुभलक्षणा ।
कल्पितां मुनिपुत्रैश्च पर्णशालामुपाविशत् ॥ १३ ॥
दत्तानि मुनिपत्नीभिः फलानि बुभुजे पयः ॥ १४ ॥
पीत्वा सुनिर्मलं तस्या शालायां सा स्म तिष्ठति ।
नौति स्म चरणौ नित्यं वाल्मीकेः शृणुते कथाः ॥ १५ ॥
एवं तस्मिन्वसंत्याश्च सीताया ह्यगमन्नव ।
मासा गर्भस्य वाल्मीकेराश्रमे फलितद्रुमे ॥ १६ ॥
अतीते नवमे मासे जानकी सुषुवे यमौ ॥ १७ ॥
निशीथे सुमुहूर्ते च मुनिपत्न्यो विचक्षणाः ।
तत्रत्यमुपचारं तु कल्पयामासुरागताः ।
गायन्ति गीतं हर्षेण सीतेयं सुषुवे यमौ ॥ १८ ॥

अनयोः प्रभया वेश्म दीप्तमासीत् समन्ततः ।
दिशस्तु विमला जाता ववौ वातोऽतिसौरभः ॥ १९ ॥
प्रदक्षिणार्चिस्तत्रासौ व्यशोभत हुताशनः ।
ततः शिष्याः प्रधावन्ति वाल्मीकिं प्रति शंसितुम् ॥ २० ॥
असूत पुत्रौ भो ब्रह्मन्! जानकी विस्मयो महान् ।
ततो मुनिः कुशाव्रम्याँल्लवान्मुष्टिमितान्दधन् ॥ २१ ॥
आगतो यत्र तौ बालौ दृष्ट्वा हर्षसमन्वितः ।
तावभ्यषिञ्चदर्भैश्च लवैः सार्धं मुनिस्तदा ॥ २२ ॥
तन्नामानौ मुनिश्चक्रे कुशो लव इति स्वयम् ।
दिने दिने वर्धमानौ चन्द्रसूर्याविवोदितौ ॥ २३ ॥
जातकर्मादिकं सर्वं चक्रे स ऋषिसत्तमः ।
द्वादशाब्दे ततो मौञ्जीबन्धनं व्यदधात्तयोः ॥ २४ ॥
प्रार्थयित्वा कामधेनुं वसिष्ठान् मुनिपुङ्गवः ।
वाल्मीकिर्भोजयामास ब्राह्मणान् वनवासिनः ॥ २५ ॥
कामधेनोः सकाशाद्धि भक्तः प्रादुरभूच्छुभः ।
सूपं विचित्रं मुद्गानां शाकाश्च विविधा अपि ॥ २६ ॥
चन्द्रबिम्बसमा जाताः पूपाः शतसहस्रशः ।
पूरिका घृतपक्वाश्च शतच्छिद्रा उदुम्बराः ॥ २७ ॥
फलान्यमृतकल्पानि प्रादुर्भूतानि धेनुतः ।
करञ्जिका मोदकाश्च तथा वै सूत्रकोद्भवाः ॥ २८ ॥

निस्तुषाणां तिलानां च नारिकेलसमुद्भवाः ।
चारबीजोद्भवा वृक्षनिर्यासकृतबन्धनाः ॥ २९ ॥
फेणिकाश्चन्द्रबिम्बाभाः सहस्रपुटसंयुताः ।
पर्पटा माषसंभूतास्तथातण्डुलचूर्णजाः ॥ ३० ॥
एवंविधानि चान्नानि पक्वान्नानि ददाति गौः ।
तेन चान्नेन वाल्मीकिस्तर्पयामास ताञ्जनान् ॥ ३१ ॥
ततः कृतोपनयनावागतौ द्वौ कुमारकौ ।
अध्येषातां शिशू वेदं साङ्गं वाल्मीकिनोदितम् ॥ ३२ ॥
तस्माद्रामचरित्रं तत् जगतुर्मधुरस्वनौ ।
लवस्तालधरश्चासीद्वीणाहस्तः कुशो जगौ ॥ ३३ ॥
आलापैर्गगनं सर्वं व्याप्नुवञ्छृण्वतां मनः ।
ततस्ते मुनयो हृष्टाः साधु साध्विति चाब्रुवन् ॥ ३४ ॥
धनुषी प्रददौ धीमान्वाल्मीकिः सगुणे दृढे ।
इषुधी चाक्षयौ रैभ्यस्ताभ्यां तस्य मुनेः सखा ॥ ३५ ॥
तपोधनास्ततः सर्वे अस्त्रग्रामं तयोर्ददुः ।
तपोबलेन ते सर्वे मुनयः प्रददुः शरान् ॥ ३६ ॥
किरीटकवचान्येके ददुः खड्गौ च चर्मणी ।
एवं धनुर्धरौ वीरौ तनुत्राणभृतौ यमौ ॥ ३७ ॥
काकपक्षधरौ तस्मिन्नाश्रमे चरतः स्म तौ ।
सीतां शुश्रूषमाणौ तौ कन्दमूलफलैः शुभैः ॥ ३८ ॥

पादसंवाहनैश्चापि परां प्रीतिं वितेनतुः ।

जैमिनिरुवाच—

अयोध्यायां महाबाहुः पालयन् रघुवंशजः ॥ ३९ ॥
न शर्म लेभे रामोऽसौ ब्रह्महत्याभिपीडितः ।
अश्वमेधक्रतुवरं कर्तुकामोऽप्यभूद् रघुः ॥ ४० ॥
वसिष्ठं च समाहूय विश्वामित्रं च गालवम् ।
वामदेवं स जाबालिमिदं वचनमब्रवीत् ॥ ४१ ॥

राम उवाच—

अश्वमेधं करिष्यामि कथ्यतां तस्य वै विधिः ।
अश्वश्च कीदृशो भाव्यो दानं कीदृग्विधीयते ।
किं मया चरणीयं स्याद् व्रतं तच्च निरूप्यताम् ॥ ४२ ॥
ततो वसिष्ठः कथयाम्बभूव
दुःखेन साध्यः किल यज्ञ एषः ।
अश्वश्च भाव्यः कुमुदेन्दुवर्णः
पीतश्च पुच्छे मलिनश्च कर्णे ॥ ४३ ॥
स रक्षणीयोऽब्दमलं नृवीरै-
र्धृतः परैश्चापि विमोक्षणीयः ।
आरम्भ एवास्य हि विप्रवर्याः
पूज्याः सहस्रं श्रुतिपारगाश्च ॥ ४४ ॥

एको रथो वारण एक एव
दशाश्वमुख्याश्च सुवर्णभारः ।
शतं गवां हेमविभूषितानां
प्रस्थश्च देयो वरमौक्तिकानाम् ॥ ४५ ॥
एकैकशो भृत्यचतुष्टयं च
कार्येषु दक्षं किल देयमत्र ॥ ४६ ॥
असिपत्रव्रतं राम ! कथं त्वं न विधास्यसि ।
यज्ञकर्मणि वै भार्या द्वितीया सहधर्मिणी ।
तया विरहितं राम ! विफलं परिकथ्यते ॥ ४७ ॥

राम उवाच—

सौवर्णी प्रतिमा कार्या जानकीसदृशी प्रभो ! ।
तादृश्या सीतया सार्धं करिष्ये व्रतमुत्तमम् ॥ ४८ ॥
अश्वमेधसमारम्भः क्रियतां मुनिपुङ्गवैः ।
अश्वशालासु रुचिरं शास्त्रोक्तैर्लक्षणैर्युतम् ॥ ४९ ॥
निरीक्ष्य वाजिनं मह्यं ततो दीक्षा प्रदीयताम् ।
तद्भाषितमुपश्रुत्य वसिष्ठो मुनिभिर्वृतः ॥ ५० ॥
वाजिशालासु धवलमश्वमाहारयन्नरैः ।
गोक्षीरवर्णं मुखतः कुङ्कुमाभं सुकेसरम् ॥ ५१ ॥
एकतः श्यामकर्णं तं हयमालोक्य विस्मितः ।
वसिष्ठो ब्राह्मणान्सर्वान्सहस्रं पर्यपूजयत् ॥ ५२ ॥

वस्त्रालङ्करणैर्दिव्यैर्वाजिभिश्च मनोजवैः ।
रथैश्च वारणैर्मत्तैः कलगीततरैः शुभैः ॥ ५३ ॥
दीग्धैर्मिर्धेनुभिश्चैव पूजयामास तान्द्विजान् ।
ततश्च दीक्षितो रामस्तादृश्या सीतया सह ॥ ५४ ॥
हयं तं पूजयामास चन्दनेन सुगन्धिना ।
पुष्पैः स्रग्भिश्च चमरैः शोभितं रघुनन्दनः ॥ ५५ ॥
भाले बद्ध्वा च सौवर्णं पत्रं तस्य हरेः पुनः ।
तस्मिन्पत्रे विलिखितं रामो दशरथात्मजः ॥ ५६ ॥
एकवीराऽद्य कौसल्या तस्याः पुत्रा महाबलः ।
तेन मुक्तं हरिवरं गृह्णातु बलवान्नृपः ॥ ५७ ॥
इत्यभिप्रायसहितं पत्रं भाले व्यशोभत ।
शत्रुघ्नं चादिदेशाथ त्वया रक्ष्यस्तुरङ्गमः ॥ ५८ ॥
ततः स तुरगो मुक्तः पृष्ठतो लक्ष्मणानुजः ।
अक्षौहिणीभिस्तिसृभिर्जगाम सहितो बली ॥ ५९ ॥
नाना देशान्व्यतिक्रम्य नगरोपवनानि च ।
लीलया विचचाराशु शत्रुघ्नसहितो हयः ॥ ६० ॥
राजानस्तं हयं दृष्ट्वा नमश्चक्रुः पराङ्मुखाः ।
ये शूरा बलवन्तश्च ते गृह्णन्ति हयोत्तमम् ॥ ६१ ॥
ताञ्जित्वा बलवान्वीराञ्छत्रुघ्नोऽमोचयद्धयं ।
ततः स तुरगः प्राप्तो वाल्मीकेराश्रमे शुभे ॥ ६२ ॥

वाल्मीकिर्वरुणाहूतो मखार्थं तलमभ्यगात् ।
आश्रमोपवनं रम्यं प्रविवेश तुरङ्गमः ॥ ६३ ॥
दाडिमाः फलिता यत्र चूताः पल्लविनो नवाः ।
मुनिद्रुमाः पुष्पवन्तो राज्यः किं चन्द्रिकाञ्चिताः ॥ ६४ ॥
अनेकाः पुष्पजात्यश्च पुल्लिता देवता इव ।
मृद्वीका मण्डपा रम्या घटयन्त्रैः सुशोभिताः ॥ ६५ ॥
रम्भास्ताः फलिता यत्र स्वर्लोकात्किं समागताः ।
तद्रक्षमाणो वीरोऽसौ धनुष्पाणिर्लवो बली ॥ ६६ ॥
दूर्वाङ्कुरांश्चरन्तं तु वाजिनं ददृशे पुरः ।
ऋषिपुत्रान्समाहूय हयाभ्याशं जगाम सः ॥ ६७ ॥
हरेर्भालगतं पत्रं वाचयामास बालकः ।
एकवीराद्य कौसल्या तस्याः पुत्रो रघूद्वहः ॥ ६८ ॥
तेन रामेण मुक्तोऽसौ वाजीगृह्णात्विमं बली ।
तत्पत्रस्थमभिप्रायं ज्ञात्वा शीघ्रं लवोऽब्रवीत् ॥ ६९ ॥
अस्माकं जननी वन्द्या त्वेकवीरा न सा किमु ।
इत्येवमुक्त्वा वचनं लवो दध्रे तुरङ्गमम् ॥ ७० ॥
उत्तरीयं समुत्क्षिप्य बबन्ध कदलीतरौ ।
वारयन्ति स्म तं वीरं मुनिपुत्रा भयान्विताः ॥ ७१ ॥

मुनिपुत्रा ऊचुः—

लव ! त्वया रामवाजी वृथाऽयं बध्यते बलात् ।

अस्य ये रक्षकास्ते त्वां नेष्यन्ति त्यज्यतामयम् ॥ ७२ ॥
अनादृत्य वचस्तेषामब्रवीत् कुपितो लवः ।

लव उवाच—

ऋषिस्त्रीकुक्षिजा यूयमहं सीतोदरोद्भवः ॥ ७३ ॥
सीतायाश्चोदरे जातः कृपिरेव न संशयः ।
यद्यमुं वाजिनं बद्ध्वा मुच्येयं भयशङ्कया ।
परं श्रेयस्तु मरणं न लज्जा मामुपाव्रजेत् ॥ ७४ ॥

इति कुशलवोपाख्याने

तुरगग्रहणोनाम

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

ततः प्राप्तं महत्सैन्यं रथवाजिसमाकुलम् ।
मत्तद्विरदसंबाधं पत्तिभिश्च समावृतम् ॥ १ ॥

कुतोऽश्वश्च कुतोऽश्वश्च व्याहरन्तो महाबलाः ।
रथिनः शतसाहस्राः प्राप्ताः शत्रुघ्नपालिताः ॥ २ ॥

ददृशुः कदलीवृक्षे बद्धमश्वं महारथाः ।
पप्रच्छुः केन बद्धोऽयं लघूंस्तान्ब्रह्मचारिणः ॥ ३ ॥

तेऽब्रुवन्नाम्रवृक्षस्य मूले तिष्ठति निर्भयः ।
लवश्च नाम्ना विख्यातस्तेनायं विधृतो हयः ॥ ४ ॥

प्रहस्य रथिनस्ते तु प्रोचुर्मूर्खोऽस्ति बालकः ।
बलं हयं पालयन्नो न जानात्येष वै शिशुः ॥ ५ ॥

मुच्यतां मुच्यतां चाश्वो यथा शीघ्रं व्रजेद्धराम् ।
तावत्प्राप्तो महाबाहुर्धनुष्पाणिर्लवो बली ॥ ६ ॥

किमिदं गर्वितैर्वीरैः क्रियते हयमोचनम् ।
मां जित्वा मुच्यतामश्वो मयि तिष्ठति न क्वचित् ॥ ७ ॥

अशृण्वतां वचस्तेषां मोक्तॄणां हयमुत्तमम् ।
चिच्छेद हस्तान्स लवो बलेन निशितैः शरैः ॥ ८ ॥

ते छिन्नहस्ता योद्धारो ब्रुवन्ति स्म निपात्यताम् ।
ततस्तं शरवर्षेण वटुषुस्ते समागताः ॥ ९ ॥

केचिच्छक्तीश्च पाशांश्च चिक्षिपुः शतशो बलात् ।
आपतच्छरसंघातो न पस्पर्श लवं तदा ॥ १० ॥
यथा हि गौतमीतोये स्नातं पापचयो महान् ।
तच्छस्त्रसङ्घं चिच्छेद योगीव भवबन्धनम् ॥ ११ ॥
पञ्चभिः पञ्चभिर्बाणैरेकैकं हृद्यताडयत् ।
निषङ्गाभ्यामक्षयाभ्यां गृह्णन्बाणान्मुमोच सः ॥ १२ ॥
गजा भिन्ना द्विधा बाणैः शुण्डाश्छिन्ना द्विधा द्विधा ।
शिरांस्याधोरणानां च चिच्छेद निशितैः शरैः ॥ १३ ॥
काश्मीरकंबलान्वीरो घण्टाश्चिच्छेद लम्बिताः ।
हस्तिमञ्चान्पताकाश्च व्यलुनात्स लवो बली ॥ १४ ॥
रथान्काञ्चनसन्नाहानच्छिनद्धन्विनां वरः ।
चक्राणि चक्ररक्षांश्च त्रिवेणून् सारथींस्तथा ॥ १५ ॥
अश्वांश्च व्यधमद्बाणैस्तथा वै रथसारथीन् ।
चामराणि ध्वजस्तम्भान् धनूँषि सुदृढानि च ॥ १६ ॥
तूणीरान्निशितैर्बाणैश्चिच्छेद स कुशानुजः ।
अवधीत्तुरगांश्चापि सोऽश्वारोहान् रघूत्तमः ॥ १७ ॥
पदातीन्सायुधान्प्रासांश्चिच्छेद तिलशस्तदा ।
एवं लवो महत्कर्म चक्रे संग्राममूर्द्धनि ॥ १८ ॥

जैमिनिरुवाच—

स दृष्ट्वा निहतं सैन्यं बालकेन पदातिना ।

शत्रुघ्नः कुपितो वीरो रथमारुह्य चागमत् ।
विस्फारयन्धनुः श्रेष्ठं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १९ ॥

एवं वदन्तं शत्रुघ्नं विव्याध दशभिः शरैः ।
श्रयन्माहेश्वरं स्थानं लवो निर्भयमानसः ॥ २० ॥

हृदि चैकेन विव्याध चतुर्भिश्चतुरो हयान् ।
अच्छिनद्ध्वजमेकेन चतुर्भिश्चक्ररक्षकान् ॥ २१ ॥

ततश्चैकेन बाणेन धनुर्ज्यामच्छिनल्लवः ।
आरोपयित्वा शत्रुघ्नो ज्यां द्वितीयां शरासने ॥ २२ ॥

ततो नालीकनाराचांस्तीक्ष्णभल्लान्मुमोच सः ।
त्रिभिर्ललाटे विव्याध लवं तं लक्ष्मणानुजः ॥ २३ ॥

त्रिभिस्तैस्ताडितो बालः प्रहसन्वाक्यमब्रवीत् ।

लव उवाच—

ललाटे मम पुष्पाणि लग्नानि कमलानि किम् ॥ २४ ॥

एतावत्ते बलं वीर समग्रं परिलक्ष्यते ।
इत्येवमुक्त्वा वचनं चतुर्भिश्चतुरो हयान् ॥ २५ ॥

अनयन्निशितैर्बाणैर्यमस्य सदनं महत् ।
सारथेश्च शिरः कायाच्छरेणैकेन चाहरत् ॥ २६ ॥

द्वाभ्यां शराभ्यां चिच्छेद ध्वजं चास्य समुच्छ्रितम् ।
द्विधा चक्रे लवो बाणैः शत्रुघ्नस्य धनुर्दृढम् ॥ २७ ॥

स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
शत्रुघ्नः कुपितो वीरो धनुरन्यत् समाददे ॥ २८ ॥
सगुणं धनुरादाय शरं चैकं समाददे ।
पीतवर्णं सुनिशितं गार्ध्रपत्रैरलङ्कृतम् ॥ २९ ॥
ततोऽब्रवीत्स शत्रुघ्नः पलायस्व शिशोऽधुना ।
अन्यथा मरणं ते स्यात्कृपा मां बाधते त्वयि ॥ ३० ॥
तदाकर्ण्य वचस्तस्य कुपितो बलवाँल्लवः ।
चिच्छेद तं शरं दिव्यं स द्विधा व्यापयद्विभो ! ॥ ३१ ॥
यथा हि पूर्वजाः पापात्स्वर्गाद्वै निपतन्त्यधः ।
कूटसाक्ष्यं च ये कुर्युर्व्यवहारच्युतास्तथा ॥ ३२ ॥
शत्रुघ्नो विस्मयाविष्टो बाणं चान्यं समाददे ।
तं शरं कालसंकाशं यावद्धनुषि संदधे ॥ ३३ ॥
तावत्स चापं सशरं चिच्छेद कुपितो लवः ।
ततो जग्राह शत्रुघ्नो लवणं येन चावधीत् ॥ ३४ ॥
तद्धनुस्तं शरं दिव्यं सूर्यवैश्वानरप्रभम् ।
मुमोच बाणं रुचिरं हतोऽसीति वचस्तथा ॥ ३५ ॥
अमोघं स शरं ज्ञात्वा लवः सस्मार तं कुशम् ।
अस्मिन्नवसरे भ्राता कुशो मे विद्यते यदि ॥ ३६ ॥
तदाऽस्य बाणस्य भयं न स्यान्मम कदाचन ॥ ३७ ॥
अथ ते जानकीसत्यात्यातिव्रत्यादमुं शरम् ।

छेत्ता मे स्यात्ततः कीर्तिरिति बाणं मुमोच सः ।
तेन बाणेन तं बाणं मध्ये चिच्छेद बालकः ॥ ३८ ॥

जैमिनिरुवाच —

पूर्वार्धं न्यपतद्भूमावुत्तरार्धं च नापतत् ।
तेनार्धेन धनुश्छिन्नं लवस्य हृदयं तथा ॥ ३९ ॥

स छिन्नधन्वा हृदि ताडितो भृशं
विभग्नचापो निपपात भूतले ।
शिखी सुवेषो रुधिरावलिप्तो
मुमोह बालो न विवेद किंचन ॥ ४० ॥

ततः शंखाश्च भेर्यश्च वादयन्तः सुहर्षिताः ।
योधाः शत्रुघ्नसैन्यस्थाः मृतशेषा जगर्जिरे ॥ ४१ ॥

मुमुचुस्तं हयं वीरा भीतं दृष्ट्वा च तं लवम् ।
मुक्तः स तुरगो योधैर्वभ्रामा पवने तदा ॥ ४२ ॥

कृपाविष्टश्च शत्रुघ्नो लवमुत्थाप्य पाणिना ।
रामाकृतिरयं बालः सिच्यतां पयसाऽधुना ॥ ४३ ॥

ततस्ते सेवकाः शीघ्रमम्भोभिः सिषिचुर्लवम् ।
सजीवं रथमारोप्य पृष्ठतोऽश्वस्य ते ययुः ॥ ४४ ॥

इति कुशलवोपाख्याने
लवमूर्छाप्राप्तिनाम
पञ्चमोऽध्यायः

षष्ठोऽध्यायः

जैमिनिरुवाच

अश्वे प्रचलिते तस्मिँल्लवे नीते महारथैः ।
अश्रुपूर्णमुखाः सीतां मुनिपुत्रास्तदा ययुः ॥ १ ॥
सीते ! बद्धो लवेनाश्वः कस्यचिन्नृपतेर्बलात् ।
नृपतेस्तस्य सैन्येन पुत्रस्ते युयुधे लवः ॥ २ ॥
निहत्य सैन्यं बालोऽसौ श्रान्तो वीरेण केनचित् ।
धृतो हस्तगतं छित्त्वा धनुर्नीतः पुरं प्रति ॥ ३ ॥
तद्वाक्यमाकर्ण्य बभूव जानकी
चित्रस्थिता देववरांगना सती ।
यथा हि विद्युद्ध्वनिना कुमारिका
घनी नरो वस्त्वपहारतो यथा ॥ ४ ॥

सीतोवाच—

मनसा कर्मणा वाचा यद्यहं रामतत्परा ।
तेन सत्येन मे पुत्रो लवोऽस्तु कुशली रणे ॥ ५ ॥
तावज्जीव्याल्लवः पुत्रो यावज्ज्येष्ठः समाव्रजेत् ।
एकाकी निहतो बालः पापिष्ठैस्तैर्महारथैः ॥ ६ ॥
रुरोद सा भृशं बाला पुत्रशोकेन पीडिता ।
मामनापृच्छ्य यातोऽसि शासने निरतो लव ! ॥ ७ ॥

चन्द्रबिम्बसमानं ते मुखं बाणैरभिद्यत ।
गात्रं च शकलीजातं लवस्य निशितैः शरैः ॥ ८ ॥
कन्दमूलफलाशी च द्वादशाब्दो विचक्षणः ।
परं तु युद्धचतां तेषां शूराणां तं च बालकम् ॥ ९ ॥
कराः कथं प्रवृत्तास्ते निर्दयानां च पापिनाम् ।
अस्मिंश्च समये तातो वाल्मीकिर्न कुशो बली ॥ १० ॥
कस्येदं पुरतो वक्ष्ये दुःखं प्राप्तं सुदारुणम् ।

जैमिनिरुवाच—

तावत्समित्कुशाहारी वनान्निवर्तते कुशः ।
आगच्छतः कुशस्याथ दुर्निमित्तानि भारत ! ॥ ११ ॥
बहूनि पथि जातानि चित्तोद्वेगकराणि च ।
अपसव्यं मृगा यान्ति नदन्तो भैरवं रवम् ॥ १२ ॥
ततः स व्यथयाविष्टो रामपुत्रो रघूद्वहः ।
चिन्तयामास मनसा केशवं विघ्नहारिणम् ॥ १३ ॥
चिन्तयाविष्टमनसो बाहू तौ स्फुरितौ भृशम् ।
नेत्राभ्यां स्वयमेवाम्भः सुस्रुवे विव्यथे मनः ॥ १४ ॥
एवं स आश्रमद्वारं कुशः प्राप्तो व्यचिन्तयत् ।
लवो जवेन चायाति कथं मे सम्मुखो न हि ॥ १५ ॥
आयातं तं लवं प्रातर्निवारयितवानहम् ।
तस्मात्किं कुपितो नैति केन चासौ धृतो लवः ॥ १६ ॥

इत्येवं चिन्तयन्वीरो ददर्श जननीं स्वकां ।
सीतां नमस्कृत्य कुशो जगाद वचनं शुभम् ॥ १७ ॥
मातः ! कस्मात्पलापोऽयं क्रियते क्व लवो गतः ।

सीतोवाच—

वत्स ! त्वयि गतेऽरण्ये फलान्याहर्तुमञ्जसा ॥ १८ ॥
सहितो मुनिपुत्रैस्तु लवः क्रीडापरायणः ।
उद्यानं गतवांस्तत्र कस्यचिन्नृपतेर्हयः ॥ १९ ॥
विचरन्निच्छया प्राप्तो ह्यग्रहीत्तं बलाल्लवः ।
यथाबलं युद्ध्यमानो रणे मूर्च्छामुपागतः ॥ २० ॥
तैर्नीयते पुरं बद्ध्वा जीवन्वा मृत एव वा ।
कस्तं मोचयिता बालं त्वां विना कुश पुत्रकः ! ॥ २१ ॥
यथा विष्णुः स्मृतो भक्तं संसारान्मोचयेद् द्रुतम् ।
तत्तस्या वचनं श्रुत्वा त्रिशाखां भ्रुकुटीं दधत् ॥ २२ ॥
नेत्रे विलोहितो विभ्रत्कुशो वचनमब्रवीत् ।

कुश उवाच—

अद्य मद्बाणभिन्नानां वैरिणां रुधिरं धरा ॥ २३ ॥
पास्यते रुधिरं कोष्णं शोषितं सूर्यभानुभिः ।
इन्द्रश्च वरुणो वापि कुबेरो वा महाबलः ॥ २४ ॥
यमश्च यक्षगंधर्वास्तेषां साहाय्यकारिणः ।
भवन्तु सर्वे देवाश्च साध्याश्चापि मरुद्गणाः ॥ २५ ॥

तथाऽपि तान् रणे जित्वा लवं तं परिमोचये ।
एष गच्छामि भो मातः निषङ्गौ धनुरेव च ।
प्रदेहि चर्मखड्गं च किरीटं कवचं तथा ॥ २६ ॥
तत्पुत्रवचनं श्रुत्वा सत्वरं जानकी तदा ।
प्रविश्य शालां तां रम्यां प्रददाविषुधी धनुः ॥ २७ ॥
चर्मखड्गं किरीटं च कवचं च कुशोऽग्रहीत् ।
सन्नद्धः कवची खड्गी चापबाणधरो युवा ॥ २८ ॥
कुशो ययौ नमस्कृत्य जननीं तां च जानकीम् ।
सीतयाऽसौ प्रयुक्ताशीः कुशो बाहू व्यताडयत् ॥ २९ ॥
विस्फारयन्धनुश्चोग्रं जगाम त्वरितो बली ।
यथा मत्तद्विपान् सिंहीतनयोऽभ्येति निर्भयः ॥ ३० ॥

गच्छतस्तांस्ततो दृष्ट्वा शत्रून् दूरादथाह्वयत् ।
तिष्ठन्तु वैरिणः सर्वे यदि शक्तिर्हि विद्यते ॥ ३१ ॥
नो चेद्बन्धुर्मदीयोऽसौ मुच्यतां वाथ युद्ध्यताम् ।
अनिर्जित्य कुशं वीरं नोपसर्पितुमर्हथ ॥ ३२ ॥
तच्छ्रुत्वा वचनं घोरं योधा वाक्यमथाब्रुवन् ।
कोऽयमायाति वीरोऽसौ खड्गचर्मधरो युवा ॥ ३३ ॥
शरचापयुतः शूरः किरीटी कवची महान् ।
कालो नूनं हि सर्वेषामयं नो भविता किल ॥ ३४ ॥
इति जल्पन्ति ते सर्वे सैनिका भयविह्वलाः ।
ध्वजाः कणकणायन्ते द्रुमा वातेरिता इव ॥ ३५ ॥

किरीटानि च वीराणां गृध्राः पस्पर्शुरम्बरात् ।
तस्मिन्काले निषङ्गेभ्यः स्वयं निर्यान्त्यलं शराः ॥ ३६ ॥
कोशेभ्यश्च पृथग्भूताः स्वयमेवासयो ययुः ।
चण्डो वातः प्रववृते द्रुमानुन्मूलयन्ध्वजान् ॥ ३७ ॥
रजसा संवृतं व्योम सूर्योऽन्तर्धानमागमत् ।
क्षणात्प्रशान्ते रजसि वीरास्तं ददृशुः कुशम् ॥ ३८ ॥

जैमिनिरुवाच—

आयान्तं तं कुशं दृष्ट्वा शत्रुघ्नो वाक्यमब्रवीत् ।
गच्छ सेनापते ! शीघ्रं निवारय शिशुं शरैः ।
यावत्सैन्यं व्यूहयामस्तावद्युध्यस्व मारिष ! ॥ ३९ ॥

सेनापतिरुवाच—

अहमेनं हनिष्यामि प्रसादात्तव सुव्रत ! ।
इत्युक्त्वा प्रययौ बालं सेनाध्यक्षस्तदा बली ॥ ४० ॥
तिष्ठ तिष्ठेति चोवाच विव्याध दशभिः शरैः ।
कुशस्तानच्छिनद्बाणान् सेनावाहमताडयत् ॥ ४१ ॥
चतुर्भिश्चतुरोऽस्याश्वाञ्जघान कुपितः कुशः ।
सारथेश्च शिरः कायाज्जहार प्रहसन्निव ॥ ४२ ॥
रथं च तिलशः कृत्वा तान्हत्वा पार्ष्णिसारथीन् ।
चिच्छेद च धनुस्तस्य कवचं चातिनिर्मलम् ॥ ४३ ॥

द्वाभ्यां शराभ्यां चिच्छेद हस्तौ तस्य दुरात्मनः ।
चरणौ व्यलुनात्तस्य जङ्घे ते मांसले कुशः ॥ ४४ ॥

जहार श्मश्रुलं वक्त्रं कण्ठाज्ज्वलितकुण्डलम् ।
सेनावाहे हते तस्मिन्हाहाकारो महानभूत् ॥ ४५ ॥

सेनावाहं हतं दृष्ट्वा भ्राता तस्य नगाह्वयः ।
आजगाम गजारूढः शक्त्या तमहनत्कुशम् ॥ ४६ ॥

तां शक्तिं वह्निकूटाभां ज्वलन्तीमशनीमिव ।
चिच्छेद पञ्चभिर्बाणैः सीतासूनुर्महाबलः ॥ ४७ ॥

चरणांश्चतुरोऽप्यस्य गजस्य व्यलुनात्कुशः ।
स छिन्नचरणात्तस्माद् गजादाप्लुत्य धारयन् ॥ ४८ ॥

गदां विचित्रां महतीं नगोऽसौ व्यगमत्कुशम् ।
कुशस्तं गदिनं हस्तं चिच्छेदाशीविषोपमम् ॥ ४९ ॥

वामहस्तेन भूमिस्थं चक्रं जग्राह सत्वरः ।
तमप्यपातयद् भूमौ बाहुं चक्रधरं कुशः ॥ ५० ॥

तथाऽपि धावमानस्य चरणावच्छिनद् द्रुतम् ।
स छिन्नचरणो वीरश्छिन्नबाहुर्नगो बली ॥ ५१ ॥

धूलिधूसरसर्वाङ्गो रुधिरेण परिप्लुतः ।
आससाद नगो बालं राहुः सूर्यमिवाम्बरे ॥ ५२ ॥

छिन्नाभ्यामथ बाहुभ्यां गदां चिक्षेप तं प्रति ।
स तया ताडितो वीरः पदान्न चलितः पदम् ॥ ५३ ॥

तुतोषास्य कुशो वीरः प्रतापेन च तादृशः ।
ततः सुनिशितं बाणं वधायास्य मुमोच सः ॥ ५४ ॥
शरेण तेन वै छिन्नं शिरः खे तद्बभ्रलीयत ।
शंभुना मुण्डमालार्थं गृहीतं तद्वरं शिरः ॥ ५५ ॥
एवं नगे विनिहते कुशः कोपसमन्वितः ।
तत्सैन्यं व्यहनद्बाणैर्दण्डपाणिरिवान्तकः ॥ ५६ ॥
गजान्पर्वतसंकाशान्विददार वृषेव सः ।
उच्छलद्रुधिरेणाथ वीरास्ते रक्तवाससः ॥ ५७ ॥
अजायन्त भृशं विप्राः पुष्पिता इव किंशुकाः ।
बाणैः पतद्भिस्तु बलादग्निः प्रादुरभून्महान् ॥ ५८ ॥
रथनागेन्धनो वह्निर्ववृधे स च बालकः ।
पतद्भिर्वारणैर्मत्तैर्म्रियन्ते स्म महारथाः ॥ ५९ ॥
स्वयमेव विदीर्यन्ते रथाश्चक्राणि ते ध्वजाः ।
जहुः प्राणानश्वचराः शरैर्भिन्नकलेवराः ।
हस्त्यश्वरथसंघाताः पदाता न्यपतन्भुवि ॥ ६० ॥
एवं विनिहतं सैन्यं रथनागसमाकुलम् ।
कुशेन तेन वीरेण स्वधर्मेणेव दुष्कृतम् ॥ ६१ ॥

इति कुशलवोपाख्याने
कुशयुद्धवर्णनं नाम
षष्ठोऽध्यायः

सप्तमोऽध्यायः

जैमिनिरुवाच—

ततः प्राप्तो महाबाहुः शत्रुघ्नो धुनयन्धनुः ।
विव्याध नवभिर्बाणैः कुशं तं कोपपूरितः ॥ १ ॥
ततः कुशोऽपि बलवान् रथं साश्वं व्यचूर्णयत् ।
शत्रुघ्नं हृदि विव्याध शरेणानतपर्वणा ॥ २ ॥
पुनश्च षष्ट्या विव्याध नाराचानां स्तनान्तरे ।
सोऽतिविद्धस्तु शत्रुघ्नो रथोपस्थे पपात ह ॥ ३ ॥
यथा मत्तो हि मातङ्गः स्खलितः पर्वतेऽपतत् ।
हतशेषाश्च ये योधास्तेऽप्ययोध्यां ययुर्द्रुतम् ॥ ४ ॥
अथ मूर्च्छां विहायाऽसौ लवोऽपश्यत्स्वबान्धवम् ।
उत्थाय परिरभ्यैनं कुशं वीरं जहर्ष च ॥ ५ ॥
उवाच च कुशं भ्रातर्धारयाशि तुरङ्गमम् ।
तेनानुनीतः स लवो बबन्धे तं तुरङ्गमम् ॥ ६ ॥
उभौ तौ भ्रातरौ युक्तौ यथा वायुविभावसू ।
प्रतीक्षमाणौ वीराणामागमं तस्थतुर्बलात् ॥ ७ ॥

जैमिनिरुवाच—

मृतशेषाश्च ये योधास्ते गत्वा राममब्रुवन् ।
समासीनं दीक्षितं च मृगशृङ्गपरिग्रहम् ॥ ८ ॥
त्वचं रुरोर्वसानं च दण्डधारं सुमेखलम् ।
भ्रातृभ्यां सहितं शूरं मुनिभिः परिवारितम् ॥ ९ ॥

तिलाज्यहोमसंभूतधूमेनारुणलोचनम् ।
सुवर्णसीतया युक्तं मण्डपस्थमिदं वचः ॥ १० ॥

योधा ऊचुः—

हे राम ! तेऽश्वः पृथिवीं चचार
वीरोऽपि कश्चिन्न दधार तं पुनः ।
एकोऽग्रहीत्त्वादृश एव बालक-
स्तेनास्मदीयं निहतं बलं च ॥ ११ ॥
धृतः कथंचित्तव चानुजेन
च्छित्वा धनुः श्रान्ततनुर्हि बालः ।
तस्यापरो बन्धुरदीनसत्त्वः
प्राप्तः स चापाभिधरो बलीयान् ॥ १२ ॥
तेनापि शेषं निहतं तवोग्रं
सैन्यं च सेनापतिना समेतम् ।
तस्मिन्हते कश्मलमाशु सैन्यं
जगाम सर्वाः प्रदिशो दिशश्च ॥ १३ ॥

जैमिनिरुवाच—

तेषां तद्वचनं श्रुत्वा रामो विस्मयमागतः ।
उवाच किमयं जल्पो युष्माकं किमुत भ्रमः ॥ १४ ॥
पैशाच्यं किमु युष्माकं शत्रुघ्नः केन पात्यते ।

याधा ऊचुः

न जल्पोऽस्मासु राजेन्द्र ! न भ्रमो न पिशाचता ॥१५॥

रणे शेते स शत्रुघ्नः शिशोर्बाणैः प्रपीडितः ।
ततः सुदुःखितो रामो विलपन्निदमब्रवीत् ॥ १६ ॥

राम उवाच—

विप्रद्विट् लवणो येन घातितो निशितैः शरैः ।
मदीयं वचनं कर्ता स शत्रुघ्नोऽर्भकैर्हतः ॥ १७ ॥

केन दोषेण मे भ्राता ह्यवस्थां तादृशीं गतः ।
एहि लक्ष्मण ! भद्रं ते शृणु मे परमं वचः ॥ १८ ॥

अहं हि दीक्षितो भ्रातः ! न मया योद्धुमिष्यते ।
सैन्येन महता युक्तो भ्राता तिष्ठति यत्र ते ॥ १९ ॥

तत्र गत्वा प्रयोद्धव्यं मोच्योऽश्वः सत्वबान्धवः ।
तद्वाक्याल्लक्ष्मणस्तूर्णं प्रययौ सैनिकैः सह ॥ २० ॥

ततः प्राप्तमनीकं तल्लक्ष्मणस्य भयानकम् ।
यत्राऽसौ मूर्च्छितः शेते शत्रुघ्नः सैनिकैः सह ॥ २१ ॥

ततः सुमित्रातनयः पुरस्ताज्-
ज्येष्ठो ययौ कालजिता समेतः ।
ददर्श वीरं विकलं सुकेशं
शत्रुघ्नमात्यन्तिकजीवशेषम् ॥ २२ ॥

इति कुशलवोपाख्याने
लक्ष्मणागमनं नाम
सप्तमोऽध्यायः

अष्टमोऽध्यायः

जैमिनिरुवाच—

तत्सैन्यं भीषणं दृष्ट्वा तत्प्रभुं लक्ष्मणं तथा ।
उवाच निर्भयो वीरः शत्रूणामङ्कुशः कुशः ॥ १ ॥
किमिदानीं च कर्त्तव्यं लव ! सैन्यं समागतम् ॥
वारणानां रथानां च संख्या कर्तुं न पार्यते ॥ २ ॥

लव उवाच—

युद्धमत्र प्रकर्त्तव्यं हन्तव्याः सैनिकास्त्वमी ।
कूष्माण्डफलवद्भेद्या रथाश्छेद्या रसालवत् ॥ ३ ॥
शिरांसि पक्कफलवत्पातनीयानि भूतले ।
भ्रातः कुश ! महाबाहो समग्रस्य बलस्य ते ॥ ४ ॥
न योग्यमेतत्सैन्यं स्यादगस्त्यस्येव सागरः ।
न च सिंहस्य पुरतो जम्बूकाली प्रसर्पति ॥ ५ ॥
पुण्यां भागीरथीं दृष्ट्वा पापराशिः क्षयं व्रजेत् ।
तथा त्वां समरे सेना दृष्ट्वा शीघ्रं विनश्यति ॥ ६ ॥
केवलं श्रोत्रियैरेव धार्यस्त्वं न च सैनिकैः ।
अहं हि वाहिनीवेगान्न भग्नः स्यां कथञ्चन ॥ ७ ॥
उत्तिष्ठ धनुरुद्यम्य बाणान्योजय मा चिरम् ।
अहं सैन्यमिदं सर्वं रुणध्मि निशितैः शरैः ॥ ८ ॥

इत्येवमुक्त्वा वचनं संजग्माते महाबलौ ।
दग्धुं सैन्याटवीं किं तौ प्राप्तौ वायुविभावसू ॥ ९ ॥
तौ प्रविष्टौ चमूं घोरां लक्ष्मणेनाभिपालिताम् ।
वर्षमाणौ शरान्घोराञ्जीमूताविव पर्वते ॥ १० ॥
आवर्तः सुमहानासीत्तयोः सैन्ये प्रविष्टयोः ।
मैनाकमन्दराभ्यां तु मथ्यमाने इवार्णवे ।
सिंहनादात्तयोरेव योजनार्धं गतं बलम् ॥ ११ ॥
कालजिल्लक्ष्मणौ क्रुद्धौ रुरुधाते शरैः कुशम् ।
लक्ष्मणस्य च सैन्येन लवो रुद्धोऽतिपौरुषः ॥ १२ ॥

गदासिशक्त्यृष्टिपरश्वधैश्च
कुन्तैस्तथा संभ्रमवाजियुक्ताः ।
पाशैः करग्राहकरैश्च बाल-
मेकाकिनं ते परिवव्रुरेनम् ॥ १३ ॥

द्विषो निजघ्ने निशितैः क्षुरप्रैः
शिरांसि भूमावपतन् स्फुरन्ति ।
लवो लवेनाहवकर्म कुर्वन्
ननाद कल्पान्तकरो यथा यमः ॥ १४ ॥

शतं शतेन विव्याध द्विशतं द्विशतेन च ।
सहस्रार्धं तदर्धेन सहस्रमयुतेन च ।
वीराणामहनत् क्रुद्धः प्रयुतं प्रयुतेन च ॥ १५ ॥

जैमिनिरुवाच—

चत्वारिंशद्भ्रमीर्हत्वा गजानां सिंहविक्रमः ।
शरैः संभिन्नसर्वाङ्गो दिशः सर्वा व्यलोकयत् ॥ १६ ॥
इतः सैन्यं प्रचलितं रथवारणसंकुलम् ।
लसत्खड्गप्रभाभिश्च श्यामीभूतं गजैरपि ।
ददर्श घोरं स लवो न कुशं पृथुतस्तथा ॥ १७ ॥
तदा दध्यौ चिरं बालो भ्राता मे क्व गतः कुशः ।
इति चिन्तयतस्तस्य लवस्य धनुरुत्तमम् ॥ १८ ॥
जहार राक्षसः क्रुद्धो मातुलो लवणस्य यः ।
रुधिराक्ष इति ख्यातो रामं शरणमागतः ॥ १९ ॥
लवो जवात्पलायन्तं धनुरादाय राक्षसम् ।
तिष्ठ तिष्ठेति चोवाच मत्तो जीवन्क यास्यसि ॥ २० ॥
इत्येवमुक्त्वा वचनं चक्रं जग्राह पाणिना ।
जनन्याश्चरणौ चित्ते चिन्तयित्वा महाभुजः ॥ २१ ॥

स चक्रमादाय खमुत्पपात
श्येनो यथा भक्ष्यमिव प्रगृह्णन् ।
शिखीव पुष्पान्क्षतजावलिप्तो
रराज साक्षादिव चक्रपाणिः ॥ २२ ॥

गगनस्थं लवं दृष्ट्वा योधा बिभ्युः पतेदिति ।
ततश्चापेषु रुचिराञ्छरांस्ते युयुजुर्भयात् ।
केचिद्दधुश्च चर्माणि सुदृढानि स्वमूर्धसु ॥ २३ ॥

अस्मानुपरि वीरोऽसौ पतिष्यति न संशयः ।
इति कृत्वा मतिं केचित्स्यन्दनस्याध आगमन् ॥ २४ ॥
बाणनिर्भिन्नवर्ष्माणो वारणा भुवि शेरते ।
तेषामुदरमध्यस्थाः केचिच्छन्ना महारथाः ॥ २५ ॥
एवं स्म भीता वीरा ये तेऽप्येवं चक्रिरे तदा ।
अवशिष्टा महावीरा निर्यातास्तु दशैव हि ॥ २६ ॥
राज्ञो दशरथस्यासीन्मन्त्री सुज्ञो हि तत्सुताः ।
जितश्रमो धार्मिकश्च सुकेतुः शत्रुसूदनः ॥ २७ ॥
चन्द्रो मदः शलः कालो मलः सिंहश्च ते दश ।
विव्यधुः सायकैस्तीक्ष्णैर्लवं खे चक्रपाणिनम् ॥ २८ ॥
दशभिर्दशभिर्बाणैश्चिच्छेदुश्चक्रमुच्छ्रिताः ।
छिन्नचक्रो लवः शीघ्रं जग्राह परिघं भुवि ॥ २९ ॥
जघान मन्त्रिपुत्रांस्तान्परिघेण हसन्निव ।
ते छिन्नचर्मवर्माणो निपेतुः शोणितोच्छ्रिताः ॥ ३० ॥
तावत्स राक्षसः प्राप्तो रुधिराक्षो गदां दधत् ।
गदया ताडयामास मूर्ध्नि तं लवमोजसा ॥ ३१ ॥
जगाम मूर्छां बालोऽसौ मुहूर्त्तं भूतलेऽपतत् ।
मूर्च्छां विहाय स लवस्तदा तस्थौ गजेन्द्रवत् ॥ ३२ ॥
कुन्तमादाय भूमिस्थं प्रययौ राक्षसं प्रति ।
केशेष्वाक्षिप्य तं दुष्टं कुन्तेनाभ्यहरच्छिरः ॥ ३३ ॥

स्वधनुर्जगृहे वीरः सूर्यदत्तं ननाद च ।
मुमोच निशितान् बाणान् सैन्यक्षयकरान् बहून् ॥ ३४ ॥
ततः सैन्येन महता वेष्टितः पुनरेव सः ।
गर्भस्थो हि यथा जन्तुरज्ञानेन बहिः स्थितः ॥ ३५ ॥
वेष्ट्यते तद्वदप्येषस्तेन सैन्येन वेष्टितः ।
तृणैरावेष्टितो वह्निस्तान्येव दहति ध्रुवम् ।
तद्वत्स बालस्तत्सैन्यमदहत् कोपपूरितः ॥ ३६ ॥

इति कुशलवोपाख्याने
लवयुद्धविजयवर्णनो नाम
अष्टमोऽध्यायः

नवमोऽध्यायः

जैमिनिरुवाच—

कुशस्तं लक्ष्मणं दृष्ट्वा प्रययौ सिंहविक्रमः ।
आयातं पञ्चभिर्बाणैर्लक्ष्मणोऽभिजघान तम् ॥ १ ॥
तैस्ताडितः कुशो वीरस्त्विदं वचनमब्रवीत् ।

कुश उवाच—

स्थिरो भव महावीर ! मा पदं पृष्ठतः कुरु ॥ २ ॥
इत्येवमुक्त्वा वचनं बाणं चैकं मुमोच सः ।
तेन बाणेन स रथो बभ्राम घटिकाद्वयम् ॥ ३ ॥
अतिभ्रमेण चत्वारो वाजिनः पञ्चतां ययुः ।
ततोऽन्यं रथमारुह्य लक्ष्मणो मुमुचे शरान् ॥ ४ ॥
द्वाभ्यां शराभ्यां चिच्छेद कवचं चातिनिर्मलम् ।
किरीटं च त्रिभिर्बाणैस्तदद्भुतमिवाभवत् ॥ ५ ॥
स भिन्नकवचो वीरो मुक्तत्वक् सर्पराडिव ।
तस्मिन्रणे रराजाथ सीतासूनुर्गतक्लमः ॥ ६ ॥
अब्रवील्लक्ष्मणं वीरः कुशो विनयपूर्वकम् ।
द्विषद्भावं परित्यज्य मम भारस्त्वया हृतः ॥ ७ ॥
उपकारः कृतो नूनं त्वया कर्तां तथाऽप्यहम् ।
सैन्यभारो महानस्ति तव लक्ष्मण ! साम्प्रतम् ॥ ८ ॥

तं सर्वं नाशयिष्यामि पश्य मे हस्तलाघवम् ।
अथ सूक्तं जपन्नुच्चैराथर्वश्रुतिविश्रुतम् ।
आग्नेयमस्त्रं मुमुचे सीतासूनुर्महाबलः ॥ ९ ॥
आग्नेयास्त्रात्ततो ज्वालाः प्रादुर्भूताः सहस्रशः ।
ताभिस्तस्य रथो दग्धो लक्ष्मणस्य महात्मनः ॥ १० ॥
सैन्यं दग्धं पताकाश्च वासांस्याभरणानि च ।
ज्वलत्कञ्चुकिनो वीरा दग्धश्मश्रुशिरोरुहाः ॥ ११ ॥
दह्यन्ते स्म सटापुच्छं वाजिनां हंसवर्णिनाम् ।
रथाश्चक्राणि दह्यन्ते छत्राणि चामराणि च ॥ १२ ॥
आयुधानि च सर्वाणि दग्धान्यासन् हविर्भुजा ।
दह्यमानं ततो दृष्ट्वा सैन्यं शत्रुनिबर्हणः ॥ १३ ॥
लक्ष्मणः शमयामास तदस्त्रं वारुणास्ततः ।
ततः कुशो महावीरो वायव्यं संदधे शरम् ॥ १४ ॥
वायव्यास्त्रेण ते सर्वे वीरा वियति डिडियरे ।
तदा रथगजा मत्ताः पतन्त्यनिलरंहसा ॥ १५ ॥

जैमिनिरुवाच—

सेनानीः कालजित् क्रुद्धो लक्ष्मणं वाक्यमब्रवीत् ।
संहरिष्याम्यहं बालं वेलेव मकरालयम् ॥ १६ ॥
यावत्कनिष्ठो नायाति तावत्कुर्वे पराक्रमम् ।
इत्येवमुक्त्वा वचनं कुशं प्रायात्स कालजित् ॥ १७ ॥

सेनाध्यक्ष उवाच—

त्वमद्य नूनं संप्राप्तो रामचन्द्रबलक्षयः ।
जातो यद्यपि कुर्वेऽहं कुशस्योन्मूलनं ध्रुवम् ॥ १८ ॥
कालजिद्भाषितं श्रुत्वा कुशो वचनमब्रवीत् ।

कुश उवाच—

अजागलस्तनस्येव व्यर्थं नाम विभाव्यते ।
बधिरस्य यथा कर्णौ वृथा श्रवणवर्जितौ ॥ १९ ॥
बालानां हि यथा ब्रह्म तृणस्याग्निर्यथा वृथा ।
सेनाध्यक्षः कृतः केन त्वादृशा बहुजल्पकः ॥ २० ॥
त्वयि पश्यति रे मूढ ! सैन्यं हन्ति ममानुजः ।
वाणं छिन्धि मया मुक्तं तव जिह्वाविदारकम् ॥ २१ ॥
इत्युक्त्वा कालजिज्जिह्वामलुनादिषुणा कुशः ।
मौनी त्वं सांप्रतं जातो वाहिन्यां संस्थितं लवम् ॥ २२ ॥
अनयाशु च संपूज्य त्वं मौनव्रतमाचर ।
अत्यन्तं कालजित् क्रुद्धः शरेणानतपर्वणा ॥ २३ ॥
कुशं तं हृदये विद्ध्वा वामहस्तमताडयत् ।
चिच्छेद तस्यापि कुशो बाणैर्हस्तं च दक्षिणं ॥ २४ ॥
ततोऽर्धचन्द्रेण शिरश्चिच्छेदास्य सकुण्डलम् ।
हते कालजिति प्रौढे कुशं सौमित्रिरभ्यगात् ॥ २५ ॥

वर्षन् बाणगणान् घोराञ्छालतालबटच्छिदः ।
कुशं जघान हृदये बाणैः षड्भिरथो दृढम् ॥ २६ ॥

शक्तिं चिक्षेप सौमित्रः कुशं प्रति गदामपि ।
कुन्तं खड्गं च परशुं तोमरं चर्म चाक्षिपत् ॥ २७ ॥

कुशस्तु सप्तधातूनि शस्त्राणि परिचिच्छिदे ।
ननर्द सिंहवद्वीरस्तिसृ तिसृ शरान् सह ॥ २८ ॥

इत्येवमुक्त्वा नाराचान्
पञ्चवाल्मीकिनार्पितान् ।
गार्ध्रपत्रान् सुनिशितान्
विषमान् पन्नगानिव ॥ २९ ॥

ज्वलदग्निकणान् वीरः कुशो धनुषि संदधे ।
अथ मुक्ताः शरा व्योम्नि ज्वलतो मर्मभेदिनः ॥ ३० ॥

बिभिदुर्हृदयं तस्य लक्ष्मणस्य महात्मनः ।
सौमित्रिश्च पपातोर्व्यां सूर्यः खादिव निष्प्रभः ॥ ३१ ॥

जैमिनिरुवाच—

ततः शुश्राव निनदं लवस्य स कुशो रणे ।
खड्गचर्मधरश्चायं पुप्लुवे पक्षिराडिव ॥ ३२ ॥

ददर्श तं लवं शूरं वेष्टितं गजपङ्क्तिभिः ।
खड्गेनाभ्यहनत् क्रुद्धो गजांश्च रथिनो बहून् ॥ ३३ ॥

भ्रमीर्जधान ताः सर्वाः क्षणाल्लवममोचयत् ।
वाल्मीकेराश्रमे ताभ्यां सैन्यं सर्वं निपातितम् ॥ ३४ ॥

तस्थतुर्निर्भयौ वीरौ वीक्षमाणौ स्वमाश्रमम् ॥ ३५ ॥

कुशलवोपाख्याने
लक्ष्मणसेनापराजयो नाम
नवमोऽध्यायः

दशमोऽध्यायः

जैमिनिरुवाच

गङ्गातीरे रामचन्द्रो दीक्षितो यज्ञमण्डपे ।
भरतं प्रत्युवाचाथ मुनिभिः परिवारितः ॥ १ ॥

राम उवाच—

कथं नायाति वीरोऽसौ विजित्य हयहारिणौ ।
याभ्यां पराजयं प्राप शत्रुघ्नः स तवानुजः ॥ २ ॥

सौमित्रिं वीक्ष्य सङ्ग्रामे त्रैलोक्यं सचराचरम् ।
स्वप्नमध्ये विलोयेत प्रत्यक्षं कः सहिष्यति ॥ ३ ॥

तमद्य बहुभिर्वीरैः सेवितं रोषपूरितम् ।
पतनादनुजस्यापि मयाज्ञप्तं न तौ क्षमौ ॥ ४ ॥

योधितुं वनजावज्ञौ चपलौ नाथवर्जितौ ।
लक्ष्मणस्य भयात् त्रस्तौ शरणं कं गमिष्यतः ॥ ५ ॥

वाजिनं करसंप्राप्तं पश्यतां बालचेष्टितम् ।
भरत ! प्रेरय जनांस्तं देशं यत्र मे हयः ॥ ६ ॥

जैमिनिरुवाच—

भरतेन समाहूताः पञ्चदूता महाबलाः ।
रामपार्श्वे क्षणादेत्य तानुवाच स्वयं प्रभुः ॥ ७ ॥

राम उवाच—

यात लक्ष्मणमानेतुं ब्रूत मद्वाक्यमेव तम् ।
जीवितेन युतौ युद्धे मोहनास्त्रेण मोहितौ ॥ ८ ॥
रक्षणीयौ त्वया बालौ सागसावपि लक्ष्मण !।
त्वं वीरोऽसि वृतश्चासि शूरैः सर्वास्त्रकोविदैः ॥ ९ ॥
रथस्थोऽसि समर्थोसि विरथौ तौ निराश्रयौ ।
अत्रानय शिशू वेगान्मा पातय रणेऽबलौ ॥ १० ॥
परबाले दयायुक्तं चित्तं कुर्वन्ति ये जनाः ।
ते पुत्रपौत्रैः सहिता जायन्ते भुवि साधवः ॥ ११ ॥
मया न पुत्रवदनं सीतावदनसन्निभम् ।
वीक्षितं भुवि जातेन ततस्तौ मोचयाम्यहम् ॥ १२ ॥
प्रष्टव्यौ कस्य पुत्रौ तौ किमर्थं वनचारिणौ ।
पुत्रयोर्जननी कुत्र तत्पृष्ट्वा तां समानय ॥ १३ ॥

जैमिनिरुवाच—

एवं दिशति रामे तु दूतान्प्रति विशां पते ।
तावद्दूताः शरैर्भिन्नाः क्षतजौघप्रवाहिणः ॥ १४ ॥
लक्ष्मणस्य महावीरा रामं शरणमाययुः ।
राम रामेति जल्पन्तः शंसन्त सुमहद्भयम् ॥ १५ ॥
राम राम महाबाहो त्राह्यस्मान् महतो भयात् ।
बहुलेन बलेनापि वृतः शूरः स लक्ष्मणः ॥ १६ ॥

प्राप तत्काननं घोरं शत्रुघ्नो यत्र मूर्च्छितः ।
ससैनिकः क्षतो बाणैः कुशस्य परितिष्ठति ॥ १७ ॥

कुशस्यायं क्षिन्नाङ्गैः रुधिरार्द्रैः शरैरिव ।
वीरैर्न ज्ञायते किञ्चित्किंशुकैः पुष्पितैरिव ॥ १८ ॥

वज्रपातसहा वीरा नानाशस्त्रैः प्रपीडिताः ।
न जानन्ति व्यथां ये वै ते कुशेन विमूर्च्छिताः ॥ १९ ॥

लवेनैकेन शिशुना कृता सा वाहिनी घना ।
विमुखा भूमृतं प्राप्ता दृष्ट्वा बालस्य चेष्टितम् ॥ २० ॥

लक्ष्मणस्य बलाध्यक्षः पतितो भुवि राघव ! ।
कालजिद् बहुभिः सार्द्धं कुशबाणैः प्रपीडितः ॥ २१ ॥

लक्ष्मणेन कृतं युद्धं भ्रातरौ वीक्षितौ वने ।
स्वमनः कृपया युक्तं वैरं त्यक्त्वाऽनुजस्य तत् ॥ २२ ॥

ततः कुशं प्रत्युवाच सौमित्रिः स तवानुजः ।
गच्छ बालक ! मुक्तोऽसि कनिष्ठेन समं गृहम् ॥ २३ ॥

जनन्यै ब्रूहि मुक्तोऽस्मि सामयुक्तेन केनचित् ।
लक्ष्मणस्य वचः श्रुत्वा कुशो लक्ष्मणमब्रवीत् ॥ २४ ॥

त्वं गच्छ रामं मुक्तोऽसि दुःखितं त्वां न योधये ।
न क्षमाल्पाप्यहो रामे साम्प्रतं हि विलोक्यते ॥ २५ ॥

यः सानुजं भवन्तन्तु क्लेशयन्नाऽऽगतः स्वयम् ।
भीतोऽवमानसंसर्गकारकाद्राघवादसि ॥ २६ ॥

कृता धृता त्वन्निमित्तमक्षतो याहि लक्ष्मण ! ।
प्रहराशु शरौघैर्मा पौरुषं चेद्विभाति ते ॥ २७ ॥
लक्ष्मणस्तं जघानाथ हृदये सप्तभिः शरैः ।
ते शरास्तं तदा भित्त्वा बालं युद्धे तथाविधे ॥ २८ ॥
पतिताः कानने तीक्ष्णा विविदुः पादपानपि ।
ततः कुशस्य बाणौघैर्लक्ष्मणस्य कलेवरम् ॥ २९ ॥
समाकीर्णं त्वग्विहीनं क्षणादेव रणे कृतम् ।
कर्तुं किं लक्ष्मणो वेत्ति नवीनं स्वं कलेवरम् ॥ ३० ॥
पूर्वाभ्यासेन केनापि तस्माद्बालं प्रबोधितः ।
पश्चात्पपात धीरोऽसौ कुण्डलीसायकैः क्षतः ॥ ३१ ॥
भग्नं बलं ते पतितं गतं राम दिशो दश ।
भ्रातरौ तौ महावीरौ क्षतौ शत्रुघ्नलक्ष्मणौ ॥ ३२ ॥
ताभ्यां विहीना हि वयं तुभ्यं शंसितुमागताः ।
त्यज दीक्षां रघुपते ! कुरु युद्धं वनं व्रज ॥ ३३ ॥
यावन्नायान्ति ते बाणाः कुशकार्मुकनिःसृताः ।
नान्यस्य गणना तस्य कुशस्य पुरतः प्रभो ! ॥ ३४ ॥

जैमिनिरुवाच—

एवंविधानि वाक्यानि श्रुत्वा तेषां स राघवः ।
मूर्च्छितो निपपातोर्व्यां भरतस्याग्रजस्तदा ॥ ३५ ॥
गृहीतो भरतेनाथ सिक्तश्चैवाम्भसा रघुः ।
परिमृज्यास्य नेत्रे च समाश्वास्य पुनः पुनः ॥ ३६ ॥

चेतनासहितं वीक्ष्य भरतो वाक्यमब्रवीत् ।

भरत उवाच—

मा विषादे मनः कार्षीर्लक्ष्मणं प्रति राघव ! ॥ ३७ ॥
शत्रुघ्नेन समं युद्धे तवार्थे विनिपातितम् ।
लक्ष्मणस्त्यक्तुकामोऽयं स्वदेहं दुःखितो भृशम् ॥ ३८ ॥
परित्यज्यागतो देवीं यदा प्रभृति कानने ।
सीतादुःखेन नो जीवन्पुनरायाति तेऽन्तिकम् ॥ ३९ ॥
शंसितुं स पुरा प्राप्तस्तवादेशो मया कृतः ।
तथाऽपि न कृपा जाता जानक्यां न च लक्ष्मणे ॥ ४० ॥
संस्मृत्य समये मृत्युमकरोल्लक्ष्मणो हृदि ।
अथ रामनिमित्तं हि यज्ञकार्ये सबान्धवः ॥ ४१ ॥
स्मृत्वा त्यागं हि सीताया युद्धे तत्याज जीवितम् ।
निरपराधां त्यक्त्वा यां वने सीतां समागतः ॥ ४२ ॥
तत्रत्यं किल्बिषं देहे धारयन् संस्थितः सदा ।
तस्याद्य कुशकोदण्डप्रचण्डशरगङ्गया ॥ ४३ ॥
क्षालितं किल्बिषं गात्राद्राम ! पूतोऽद्य लक्ष्मणः ।
भरतं मामपूतं हि न प्रेरयसि किंचन ॥ ४४ ॥
अद्य राघव यास्यामि तत्कर्तुं पावनं वपुः ।
विचारः सकलो जातः सीतात्यागे च ते वने ॥ ४५ ॥

अयोध्यायां स्थितो जीवन्न तथाऽद्य करोम्यहम् ।
कथं हीनोऽत्र तिष्ठामि सीताशत्रुघ्नलक्ष्मणैः ॥ ४६ ॥

एवं वदन्तं भरतं जगाद भरताग्रजः ।

श्रीराम उवाच—

कोऽसौ भरत ! जानीहि स बालो वनकानने ॥ ४७ ॥

तमानय कुशं जित्वा भानुजं मम सन्निधौ ।
समुत्थापय वीरौ तौ मूर्च्छितौ मम बान्धवौ ॥ ४८ ॥

हनूमानपि यात्वेष जाम्बवान् वानरैः सह ।
तवानुवृत्तिं कुर्वाणः कुरु वाक्यं ममोदितम् ॥ ४९ ॥

जैमिनिरुवाच—

एवं राममुमादिष्टो हनुमत्प्रमुखैर्वृतः ।
निर्ययौ भरतः क्रोधाद्रथमास्थाय सत्वरः ॥ ५० ॥

निर्गतं बहुलं सैन्यं गगने भूतलेऽपि च ।
राघवस्य पुराद्रम्यान्नरवानरसंकुलम् ॥
भरतः काननं प्राप्य हनूमन्तमुवाच ह ॥ ५१ ॥

भरत उवाच—

हनूमन् ! पश्य संग्रामे कुशबाणैर्निपातिताः ।
रामस्य वीरा बहवो विशिरस्का विबाहवः ॥ ५२ ॥

गजान्रथान्हयान्वीरान्करभान्गतमस्तकान् ।
धावमानान्पुरः पश्य गतस्वास्थ्यानितस्ततः ॥ ५३ ॥

कुतस्तौ पतितौ वीरौ रणे शत्रुघ्नलक्ष्मणौ ।
शोणितेनात्र नीयन्ते बहुलेन महाबलाः ॥ ५४ ॥
भागीरथीं प्रति बलान्नीतौ किं मम बान्धवौ ।
क्वचित्करा: क्वचित्पादाः क्वचिदन्ता नृणामिह ॥ ५५ ॥
दृश्यन्ते वाहनानां तु क्वचित्केशाः क्वचित्स्रजः ।
नदीमिमां समुल्लङ्घ्य व्रज पारं निरीक्षय ॥ ५६ ॥
यथा गतोऽसि लङ्कां त्वं तीर्त्वा जलनिधिं पुरा ।
तत्र तौ पश्य पतितौ बान्धवौ मामकौ भुवि ॥ ५७ ॥
विलोकनीयौ तौ बालौ त्वया कुशलवौ क्वचित् ।

हनूमानुवाच—

तदा तीर्णोऽस्मि भरत ! सागरं सीतया स्वयम् ॥ ५८ ॥
संमुखा सा पुरा जाता विमुखाऽद्य विलोक्यते ।
शोणितौघां नदीं मन्ये दुस्तरां लक्ष्मणाग्रज ! ॥ ५९ ॥
तथापि तव वाक्येन वीक्षितुं यामि बान्धवौ ।
इत्युक्त्वा तां नदीं तीर्त्वा ददर्श पतितावुभौ ॥ ६० ॥
शरनिर्भिन्नसर्वाङ्गौ रणे शत्रुघ्नलक्ष्मणौ ।
प्रार्थयन्ताविव धरां सीतात्यागेन दुःखिताम् ॥ ६१ ॥
मा कोपं व्रज नौ स्थानं देहि सीतादुहोरिति ।
हनूमांस्तौ गृहीत्वाऽथ बाहुभ्यां पुनरागतः ॥ ६२ ॥

भरतस्य समीपं हि मूर्च्छितौ तरसा नृप ! ।
ददर्श भरतो भिन्नौ कुशबाणैः समन्ततः ॥ ६३ ॥
रथे संस्थापयामास भ्रातरौ विस्मयान्वितः ।
रक्षणे चाङ्गदं दत्त्वा हनूमन्तमुवाच ह ॥ ६४ ॥
क्व गतौ बालकौ वीरौ रामसैन्यनिपातकौ ।
हनूमन् ! पश्य कुत्राऽपि बालवेषधरौ सुरौ ॥ ६५ ॥
गतौ लक्ष्मणशत्रुघ्नौ पातयित्वा महारणे ।

हनूमानुवाच—

मेघनादशरैर्नायं मूर्छितो लक्ष्मणस्तथा ॥ ६६ ॥
यथा कुशशरैर्व्याप्तो न जहाति हि कश्मलम् ।
मूर्छना मामुपैत्येषा वीक्ष्य लक्ष्मणमातुरम् ।
पश्यन्ति सैनिकाः सर्वे बालाभ्यां निहतं बलम् ॥ ६७ ॥

कुशलवोपाख्याने
हनूमद्भावयं
नाम
दशमोऽध्यायः

एकादशोऽध्यायः

नैमिनिरुवाच—

एतस्मिन्नन्तरे प्राप्तो धनुर्विस्फारयन् कुशः ।
खड्गचर्मधरो वीरो लवः संग्राममागमत् ॥ १ ॥
प्रकाशयित्वा पृथिवीं करैः सागरमेखलाम् ।
सूर्योऽन्तर्धानमाऽऽपेदे ध्वान्तश्च समपद्यत ॥ २ ॥
आत्मनश्च परेषां च वीरो न ज्ञायते तदा ।
अन्योऽन्यं नामभिस्ते वै क्रोशन्ति रणकोविदाः ॥ ३ ॥
गजा मत्ताश्च धावन्ति चूर्णयन्तो रथान् बहून् ।
रथवेगेनाश्ववीराः पतन्ति हयपृष्ठतः ॥ ४ ॥
हयवेगेनाश्ववीराः पत्तयो भुवि शेरते ।
दोधूय खड्गं स लवः प्रविवेश महाचमूम् ॥ ५ ॥
शिरस्याधाय चर्माशु खड्गेनाश्वपदोऽच्छिनत् ।
हस्तिहस्तान्विशालांश्च चिच्छेद स कुशानुजः ॥ ६ ॥
दीर्घहस्तौ समालम्ब्य व्रजन्नुपरि हस्तिनम् ।
विदारयति कुम्भौ स काष्ठानीव कुठारकः ॥ ७ ॥
मुक्ताफलानि जगृहे मुष्टिभिर्भुवि चाक्षिपत् ।
हस्तिदन्तेषु पतितैः खड्गैर्भृशभयानकाः ॥ ८ ॥
समुत्थिताश्चाग्निकणास्ते दहन्ति स्म सैनिकान् ।
तावत्क्रुद्धो महाबाहुः कुशो वाणान् मुमोच सः ॥ ९ ॥

शिरांसि चिच्छिदे वीरो बाहूनङ्गदभूषितान् ।
शिरांसि करिणां बाणैरनयद्दिवमोजसा ॥ १० ॥
आकाशेऽद्यापि ते प्राप्ता एकीभावं व्यवस्थिताः ।
अतः परं हि नक्षत्रं न भूतं न भविष्यति ॥ ११ ॥
तस्मान्नक्षत्रतां प्राप्ताः खे हस्ता हस्तिनां तथा ।
वर्षन्त्यद्यापि भूपृष्ठे हस्तादानोदकं बहु ॥ १२ ॥
सावित्रं तस्य यानीयं निदानं मौक्तिकस्य च ।
एवं हि करिशीर्षाणि छिन्नानि शतशो रणे ॥ १३ ॥
कुशेन तेन वारेण तद्द्रुतमिवाभवत् ।
अथ कोदण्डटङ्कारबधिरीकृतदिग्गजः ॥ १४ ॥
ददर्श भरतः किं तौ कार्तिकेयगणेश्वरौ ।
संहरन्तौ निजं सैन्यं वनं वायुर्विभावसुम् ॥ १५ ॥
मुमोच निशितान्बाणांस्तोयधारा इवाम्बुदः ।

जैमिनिरुवाच—

बालकौ कार्मुकयुतौ घनश्यामौ च संगतौ ॥ १६ ॥
काकपक्षधरौ वीक्ष्य हनूमानिदमब्रवीत् ।

हनूमानुवाच—

एतौ रामाकृती बालौ बलं रामस्य वीक्षकौ ॥ १७ ॥
सज्जास्तिष्ठन्तु सर्वत्र भरताद्या महाबलाः ।
एवं ब्रुवति वीरे तु तदा पवननन्दने ॥ १८ ॥

तावत्कुशः प्रत्युवाच लवं रणगतं तदा ।
पश्य सैन्यं लव प्राप्तं तुरङ्गं नेतुमिच्छति ॥ १९ ॥
व्रजाम्येतद्बलं भ्रातः ! तुरङ्गं त्वं हि पालय ।
ततो रामानुजं वीक्ष्य कुशो वचनमब्रवीत् ॥ २० ॥

कुश उवाच—

शत्रुघ्नो लक्ष्मणश्चोभौ शयाते निहतं बलम् ।
किन्नाम मे न जानासि शत्रुं मां कुशमागतम् ॥ २१ ॥

भरत उवाच—

त्वां नयिष्याम्यहं युद्धात्पराजित्य निजां पुरीम् ।
सानुजं त्वरितं बालं यातं मुञ्च व्रजाधुना ॥ २२ ॥
जननीं ते तापसीं मे करुणा वीक्ष्य जायते ।
जनन्यै ब्रूहि मुक्तोऽस्मि सबन्धुर्भरतेन च ॥ २३ ॥
क्षमितं स्वबलस्याद्य पातनं यत्त्वया कृतम् ।
तच्छ्रुत्वा वचनं तस्य कुशो बाणैरथार्दयत् ॥ २४ ॥
भरतस्य धनुश्छिन्नं रथश्च शकलीकृतः ।
कुशकोदण्डनिर्मुक्तैर्मुमोह भरतः शरैः ॥ २५ ॥
गिरिमुत्पाट्य हनुमान्भरतं वीक्ष्य मूर्च्छितम् ।
चिक्षेप सीतासुतयोर्मूर्ध्नि योजनमायतम् ॥ २६ ॥
तं पर्वतं दीर्घनेत्रौ बाणैश्चक्रतुरम्बरे ।
त्रसरेणुनिभं रुद्रगात्रभूतिसुखप्रदम् ॥ २७ ॥

पञ्चभिस्तं हरिसुतं प्रभिन्नमपि मूर्च्छितम् ।
शरैः कनकचित्रैश्च कुशश्चक्रे स्वपौरुषात् ॥ २८ ॥
ततो भग्नं बलं भूयो रामाय पतितं जनः ।
कथयामास राजेन्द्र ! श्रुत्वा रामो विनिर्ययौ ॥ २९ ॥
ससुग्रीवो महाबाहुर्भ्रातृदुःखेन दुखितः ।
विभीषणयुतः श्रीमान्विस्मयोत्फुल्ललोचनः ॥ ३० ॥
वनं प्राप्य रथारूढस्तौ ददर्श बलं च तत् ।
हतप्रहतविध्वस्तं रामेति परिभाषि च ॥ ३१ ॥

जैमिनिरुवाच—

पप्रच्छ रामस्तौ बालौ स्वाकृती धन्विनां वरौ ।
कुतोऽधीतो धनुर्वेदो भवद्भ्यां यद्धृतं बलम् ॥ ३२ ॥
केनोपनीतौ विधिवत्किं स्विद्वेद कृतश्रमौ ।
किंस्वित्कलासु कुशलौ धर्मश्रवणतत्परौ ॥ ३३ ॥
कस्तातः का च जननी कुत्र वासो निवेद्यतां ।
तद्भाषितमुपश्रुत्य कुशो वचनमब्रवीत् ॥ ३४ ॥

कुश उवाच—

किमस्मदीयकथया वंशजोद्भवया नृप ! ।
क्षात्रं पौरुषमुत्सृज्य कथ्यते त्वादृशैर्जनैः ॥ ३५ ॥
शीघ्रं युध्यस्व राजेन्द्र ! विलम्बः क्रियते कथम् ।
न तुरङ्गो ह्यस्मदीय उच्यतां वाथ युध्यताम् ॥ ३६ ॥

इति वाक्यं तयोः श्रुत्वा रामोऽवोच द्विशांपते !
न करिष्याम्यहं युद्धं भवान्कथयतां कुलम् ॥ ३७ ॥

कुश उवाच--

केवलं सुषुवे सीता क्षमाशीलौ च नौ वने ।
आवयोः कृतवान्सर्वं जातकर्मादिकं मुनिः ॥ ३८ ॥
उपनिन्ये च वाल्मीकिर्वेदं सम्यगपाठयत् ।
तथा रामस्य चरितं सन्मनो निर्वृतिप्रदम् ॥ ३९ ॥
मया हतं बलं सर्वं योधानां तव पश्यतां ।
ममता नास्ति ते राम ! पुत्रदारधनेषु च ॥ ४० ॥
तस्माद्धतस्य सैन्यस्य गणना ते न विद्यते ।
न शक्तिर्विद्यते राम ! सा त्यक्ता किं त्वया वने ॥ ४१ ॥
शक्तिहीनो नरः कस्तु युध्येत निशितैः शरैः ।

जैमिनिरुवाच —

रामोऽमन्यत पुत्रौ तौ सीतातनयकीर्तनात् ।
धिगस्तु खलु नो युद्धमित्युक्त्वा धनुरुज्जहौ ॥ ४२ ॥
पपात रथनीडेऽथ मूर्च्छितो रघुनन्दनः ।

जैमिनिरुवाच—

मूर्च्छां विहाय धर्मात्मा धीरः सत्यपराक्रमः ॥ ४३ ॥
सुग्रीवं परिपप्रच्छ रामः परपुरञ्जयः ।
एतौ कस्यात्मजौ वीरौ जानीहि कपिसत्तम ! ॥ ४४ ॥

सुग्रीवउवाच--

पुराणपुरुषाज्जाताविमौ मन्येऽत्र राघव ! ।
प्रतिबिम्बं तावकं हि वनमध्ये विलोक्यते ॥ ४५ ॥

नापरं संगरे मन्ये जययुक्तं विना प्रभुम् ।
तवाग्रे यामि बालौ हि युधि योधयितुं नृप ! ॥ ४६ ॥

गृहीत्वा शाखिनं राजन् ! मुमोच पुरतस्तयोः ।
तौ वृक्षं तिलशः कृत्वा चक्रतुर्मूर्च्छितं हरिम् ॥ ४७ ॥

शरैः सुनिशितैस्तावन्नीलोऽयुध्यत वानरः ।
नीलं बाणेन विव्याध कुशः कोपसमन्वितः ॥ ४८ ॥

स चापि पतितो नीलः परे भग्नश्च सैनिकाः ।
एक एव स्थितो रामो नाभवन् सैनिकाश्च ते ॥ ४९ ॥

रामो मुमोच नाराचांस्तीक्ष्णान् कालानलप्रभान् ।
मार्गणा निष्फलाः पेतुः कृपणस्येव मन्दिरः ॥ ५० ॥

मनोरथा निर्धनस्य शरन्मेघा इवाम्बरे ।
यं यं बाणं मुमोचासौ राघवः कुपितो मृधे ॥ ५१ ॥

तं तं द्विधाचक्रतुस्तौ स चतुर्धाऽभवच्छरः ।
एवं तदाऽभवद् युद्धं लोकविस्मयकारकम् ॥ ५२ ॥

दृष्ट्वा तुल्यं बलं सम्यग् बालयो रघुनन्दनः ।
सीतावदनवद्धक्त्रौ दृष्ट्वा बाणैश्च ताडितः ॥ ५३ ॥

पपात रथनीडेऽथ मूर्छितो जनमेजय ! ।
ततः कुशलवौ ज्ञात्वा मूर्च्छितं जानकीपतिं ॥ ५४ ॥

समुत्तीर्य रथात्तस्माज्जगृहातेऽस्य कुण्डले ।
केयूरं कण्ठहारं च लक्ष्मणस्यापि मण्डनम् ॥ ५५ ॥

सर्वेषामपि वीराणां पतितानां रणाङ्गणे ।
एतस्मिन्नन्तरे राजन् ! लवः कुशमथाब्रवीत् ॥ ५६ ॥

भ्रातः कुश ! ग्रहीष्यामि हनूमन्तं महाबलम् ।
सीता वोक्ष्य कपिं हृष्टा भविष्यति न संशयः ॥ ५७ ॥

रामस्य च रथं रम्यमध्यारोह सुदुर्जयम् ।
लक्ष्मणस्य रथं रम्यमधिरुह्य व्रजाम्यहम् ।
जाम्बवत्प्रमुखान्वीरान् स्वरथे परिपातय ॥ ५८ ॥

जैमिनिरुवाच--

हनूमज्जाम्बवन्तौ च मूर्छाविरहितौ भुवि ।
वानरावूचतुस्तथ्यं मीलयावोऽत्र लोचने ॥ ५९ ॥

हनूमानुवाच--

पश्य रामादयो वीरा मूर्च्छिता बालसायकैः ।
जाम्बवन्मां च कुरुते मूर्च्छितं रामसंभवः ॥ ६० ॥
किं करिष्यामि यदि मां स नेष्यति बलात्कुशः ।
सीतासमीपे मरणं भविष्यति न संशयः ॥ ६१ ॥

एवं ब्रुवाणे वीरे तु प्राप्तो रणगतो लवः ।
जग्राह वानरौ तौ हि मुदा कपटमूर्च्छितौ ॥ ६२ ॥
सीतासमीपे गत्वाथ सर्वं निगदतुश्च तौ ।
जितो रामः ससैन्यो हि समानीतं च भूषणम् ॥ ६३ ॥
वानरौ कौतुकार्थं ते मया नीतौ निरीक्षय ।
मातः ! भ्रात्रा कृतं युद्धं विजयी पुनरागतः ॥ ६४ ॥
सीता पुत्रौ परिष्वज्य वचनं चेदमब्रवीत् ।

सीतोवाच--

मानिनौ वानरौ मुञ्च रणमध्ये च पुत्रक ! ॥ ६५ ॥
मां निरीक्ष्य मृतावेतौ जीवहीनौ भविष्यतः ।
ततो लवो मुमोचैतौ रणमध्ये महामतिः ॥ ६६ ॥
एतस्मिन्नन्तरे राजन् ! वाल्मीकिर्वरुणालयात् ।
आजगाम महातेजा ऋषिभिः परिवारितः ॥ ६७ ॥
तौ गत्वाथाकथयतां सर्वं कृत्यमशेषतः ।
ततो ज्ञात्वा मुनिवरः सर्वानुत्थाप्य वारिणा ।
प्रोक्ष्यामृतमयेनैवमुवाच रघुनन्दनम् ॥ ६८ ॥

वाल्मीकिरुवाच--

तव पुत्रौ महाराज ! गृह्यतां रघुनन्दन ! ।

मन्यसे यदि सीतां च निर्दोषां नेतुमर्हसि ।
उत्थाय रामो नगरीं प्रविवेश ससैनिकः ॥ ६९ ॥
विस्मयन्नेव च हयं मुक्तं वाल्मीकिना च तम् ।
पालयामास वीरैस्तैः पश्चाद्यज्ञो महान्कृतः ॥ ७० ॥
यज्ञोत्सवे वर्तमाने वाल्मीकिर्मुनिपुङ्गवः ।
सीतां नीत्वा पुत्रयुतां संस्थाप्य रघुसन्निधौ ॥ ७१ ॥
रामः पुत्रयुतो जातः सीतया सहितः स्थितः ।
मुनीन्विसर्जयामास यज्ञान्ते च पुरस्कृतान् ।
रामः सीतागतं स्नेहं निदधे तदपत्ययोः ॥ ७२ ॥

कुशलवोपाख्याने
पुनर्मिलननाम
एकादशोऽध्यायः

समाप्तं च कुशलवोपाख्यानम्